22 कुचन्दनं ताम्रसारं रञ्जनं तिलपर्णिका ॥ ६४२ ॥
23 जातिकोषं जातिफलं
24 कर्पूरो हिमवालुका ।
25 घनसारः सिताभ्रश्च चन्द्रो
26 ऽथ मृगनाभिजा ॥ ६४३ ॥
27 मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि ।
28 कश्मीरजन्म घुसृणं वर्णं लोहितचन्दनम् ॥ ६४४ ॥
29 वाल्हीकं कुङ्कुमं वह्निशिखं कालेयजागुडे ।

12. Gemisch von Sandelholz, Agallochum, Moschus und Safran zu gleichen Theilen. — 13. 14. Agallochum (8 W.). — 15. Wohlriechende Art Agallochum. — 16. Schwarze Art Agallochum (2 W.). — 17. 18. Sandelholz (5 W.). — 19. 20. Besondere Art Sandelholz (3 W.). — 21. 22. Rothes Sandelholz (6 W.). — 23. Muskatnuss (2 W.). — 24. 25. Kampher (5 W.). — 26. 27. Moschus (5 W.). — 28—30. Safran (14 W.).

30 संकोचपिशुनं रक्तं धीरं पीतनदीपने ॥ ६४५ ॥
31 लवङ्गं देवकुसुमं श्रीसंज्ञ-
32 मथ कोलकम् ।
33 कक्कोलकं कोषफलं
34 कालीयकं तु ज्ञापकम् ॥ ६४६ ॥
35 यक्षधूपो बहुरूपः सालवेष्टो ऽग्निवल्लभः ।
36 सर्जमणिः सर्जरसो रालः सर्वरसो ऽपि च ॥ ६४७ ॥
37 धूपो वृक्षात्कृत्रिमाच्च तुरुष्कः सिल्हपिण्डकौ ।
38 पायसस्तु वृक्षधूपः श्रीवासः सरलद्रवः ॥ ६४८ ॥
39 स्थानात्स्थानान्तरं गच्छन्धूपो गन्धपिशाचिका ।
40 स्थासकस्तु हस्तविम्ब-
41 मलंकारस्तु भूषणम् ॥ ६४९ ॥
42 परिष्काराभरणे च
43 चूडामणिः शिरोमणिः ।
44 नायकस्तरलो हारान्तर्मणि-
45 र्मुकुटं पुनः ॥ ६५० ॥
46 मौलिः किरीटं कोटीरमुष्णीषं

31. Gewürznelke (3 W.). — 32. 33. Art Parfum (3 W.). 34. Desgleichen (2 W.). — 35. 36. Harz der *Shorea robusta* (8 W.). 37. Weihrauch (5 W.). — 38. Harz der *Pinus longifolia* (4 W.). 39. Der Rauch von gebrannten wohlriechenden Harzen (2 W.). 40. Das Einsalben des Körpers (2 W.). — 41. 42. Das Schmück des Körpers (4 W.). — 43. Ein Juwel, der auf dem Kopfe getı gen wird (2 W.). — 44. Der Mittelstein in einem Halsbande (2 W.). 45. 46. Diadem (5 W.).

47 पुष्पदाम तु ।
48 मूर्ध्नि माल्यं माला स्रक्
49 गर्भकः केशमध्यगम् ॥ ६५१ ॥
50 प्रभ्रष्टकं शिखालम्बि
51 पुरो न्यस्तं ललामकम् ।
52 तिर्यग्वक्षसि वैकक्षं
53 प्रालम्बमृजुलम्बि यद् ॥ ६५२ ॥
54 संदर्भो रचना गुम्फः श्रन्थनं ग्रन्थनं समाः ।
55 तिलके तमालपत्रचित्रपुण्ड्रविशेषकाः ॥ ६५३ ॥
56 आपीडः शेखरोत्तंसावतंसाः शिरसः स्रजि ।
57 उत्तंसौ कर्णपूरे ऽपि
58 पत्रलेखा तु पत्रतः ॥ ६५४ ॥
59 भङ्गिवल्लिलताङ्गुल्यः
60 पत्रपाश्या ललाटिका ।
61 बालपाश्या पारितथ्या

47. 48. Blumengewinde, welches auf dem Kopfe getragen wird (3 W.). — 49. Blumengewinde, welches in die Haare verschlungen wird. -- 50. Ein vom Scheitel herabhängendes Blumengewinde. — 51. Ein auf der Stirn befestigtes Blumengewinde. — 52. Ein quer über der Brust hängendes Blumengewinde. — 53. Ein am Halse hängendes, über die Brust fallendes Blumengewinde. — 54. Winden eines Kranzes (5 W.). — 55. Sectenzeichen auf der Stirn (5 W.). — 56. Ein Kranz, der auf dem Scheitel getragen wird (4 W.). — 57. Ein um die Ohren getragener Blumenschmuck (3 W.). — 58. 59. Das Bestreichen der Wangen, der Brust u. s. w. der Frauen mit Moschus u. s. w. (5 W.). — 60. Stirnschmuck (2 W.). — 61. Perlenschnur, mit der die Haare gebunden werden (2 W.)

62 कर्णिका कर्णभूषणम् ॥ ६५५ ॥
63 ताडङ्कस्तु ताडपत्त्रं कुण्डलं कर्णवेष्टकः ।
64 उत्क्षिप्तिका तु कर्णान्दु-
65 र्वालिका कर्णपृष्ठगा ॥ ६५६ ॥
66 ग्रैवेयकं कण्ठभूषा
67 लम्बमाना ललन्तिका ।
68 प्रालम्बिका कृता हेम्नो-
69 रःसूत्रिका तु मौक्तिकैः ॥ ६५७ ॥
70 हारो मुक्तातः प्रालम्बस्रक्कलापावलीलताः ।
71 देवच्छन्दः शतं
72 साष्टं त्विन्द्रच्छन्दः सहस्रकम् ॥ ६५८ ॥
73 तदर्धं विजयच्छन्दो
74 हारस्त्वष्टोत्तरं शतम् ।
75 अर्धं रश्मिकलापोऽस्य
76 द्वादश त्वर्धमाणवः ॥ ६५९ ॥
77 द्विर्द्वादशार्धगुच्छः स्या-
78 त्पञ्च हारफलं लताः ।

62. Ohrschmuck. — 63. Ohrring (4 W.). — 64. Besonderer Ohrschmuck (2 W.). — 65. Desgleichen. — 66. Halsschmuck. — 67. Herabhängender Halsschmuck. — 68. Halsschmuck von Gold. — 69. Halsschmuck von Perlen. — 70. Perlenschnur (6 W.). — 71. Perlenschmuck aus 100 Schnüren. — 72. Perl. aus 1008 Schn. — 73. Perl. aus 504 Schn. — 74. Perl. aus 108 Schn. — 75. Perl. aus 54 Schn. — 76. Perl. aus 12 Schn. — 77. Perl. aus 24 Schn. — 78. Perl. aus 5 Schn.

79 अर्धहारश्चतुःषष्टि-

80 गुच्छमाणवमन्दराः ॥ ६६० ॥

81 अपि गोस्तनगोपुच्छावर्धमर्धं यथोत्तरम् ।

82 इति हारा यष्टिभेदा-

83 देकावल्येकयष्टिका ॥ ६६१ ॥

84 कण्ठिका-

85 प्यथ नक्षत्रमाला तत्संख्यमौक्तिकैः ।

86 केयूरमङ्गदं बाहुभूषा-

87 थ करभूषणम् ॥ ६६२ ॥

88 कटको वलयं पारिहार्यावापौ च कङ्कणम् ।

89 हस्तसूत्रं प्रतिसर

90 ऊर्मिका त्वङ्गुलीयकम् ॥ ६६३ ॥

91 सा साक्षराङ्गुलिमुद्रा

92 कटिसूत्रं तु मेखला ।

93 कलापो रसना सारसनं काञ्ची च सप्तकी ॥ ६६४ ॥

94 सा शृङ्खलं पुंस्कटीस्था

95 किङ्किणी क्षुद्रघण्टिका ।

79. Perlenschmuck aus 64 Schnüren. — 80. 81. 1) Perl. aus 32 Schn., 2) aus 16 Schn., 3) aus 8 Schn., 4) aus 4 Schn., 5) aus 2 Schn. — 82. Dieses sind die Namen für Perlenschmuck nach der verschiedenen Anzahl der Schnüre. — 83. 84. Perlenschmuck aus einer einzigen Schnur (3 W.). — 85. Schnur von 27 Perlen. — 86. Schmuck auf dem Oberarm (3 W.). — 87—89. Armband am Handgelenk (8 W.). — 90. Fingerring (2 W.). — 91. Ein Ring mit Schrift. — 92. 93. Weiblicher Gürtel (7 W.). — 94. Männlicher Gürtel. — 95. Gürtel mit kleinen Glöckchen (2 W.).

96 नूपुरं तु तुलाकोटिः पादतः कटकाङ्गदे ॥ ६६५ ॥
97 मञ्जीरं हंसकं शिञ्जि-
98 न्यंशुकं वस्त्रमम्बरम् ।
99 सिचयो वसनं चीराच्छादौ सिञ्चोलवाससी ॥ ६६६ ॥
1 पटः प्रोतो
2 ऽञ्चलो ऽस्यान्तो
3 वर्तिर्वस्तिश्च तद्दशाः ।
4 पत्त्रोर्णं धौतकौषेय-
5 मुष्णीषो मूर्धवेष्टनम् ॥ ६६७ ॥
6 तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ।
7 त्वक्फलकृमिरोमभ्यः संभवात्तच्चतुर्विधम् ॥ ६६८ ॥
8 क्षौमकार्पासकौषेयराङ्कवादिविभेदतः ।
9 क्षौमं दुकूलं दुगूलं
10 स्यात्कार्पासं तु बादरम् ॥ ६६९ ॥
11 कौषेयं कृमिकोषोत्थं
12 राङ्कवं मृगरोमजम् ।

96. 97. Fussring (7 W.). — 98—1. Zeug, Gewand (12 W.). — 2. Saum eines Gewandes. — 3. Die Borde eines gewebten Zeuges? (3 W.). — 4. Gereinigte Seide (2 W.). — 5. Turban (2 W.). — 6. Ein reines Ober- und Untergewand. — 7. 8. Ein Zeug ist von vierfacher Art, indem es aus Rinde, aus einer Frucht, aus dem Erzeugniss eines Wurmes oder aus Haaren verfertigt sein kann, und sich demnach als leinen, baumwollen, seiden, wollen u. s. w. darstellt. — 9. Leinwand (3 W.). — 10. Baumwollenes Zeug (2 W.). — 11. Seidenzeug (2 W.). — 12. Wollenes Zeug.

13 कम्बलः पुनरूर्णायुराविकौरभ्ररल्लकाः ॥ ६७० ॥
14 नवं वासो ऽनाहतं स्यात्तन्त्रकं निष्प्रवाणि च ।
15 प्रच्छादनं प्रावरणं संव्यानं चोत्तरीयकम् ॥ ६७१ ॥
16 वैकक्षे प्रावारोत्तरासङ्गौ बृहतिकापि च ।
17 वराशिः स्थूलशाटः स्या-
18 त्परिधानं त्वधोंऽशुकम् ॥ ६७२ ॥
19 अन्तरीयं निवसनमुपसंव्यानमित्यपि ।
20 तद्ग्रन्थिरुच्चयो नीवी
21 वरस्त्र्यर्धोरुकांशुकम् ॥ ६७३ ॥
22 चण्डातकं चलनक-
23 श्चलनी त्वितरस्त्रियाः ।
24 चोलः कञ्चुलिका कूर्पासको ऽङ्गिका च कञ्चुके ॥ ६७४ ॥
25 शाटी चो-
26 ऽथ नीशारो हिमवातापहांशुके ।
27 कच्छा कच्छाटिका कक्षा परिधानापराञ्चले ॥ ६७५ ॥
28 कक्षापटस्तु कौपीनं

13. Wollene Decke (5 W.). — 14. Neues Zeug (3 W.). — 15. Obergewand (4 W.). — 16. Mantel (4 W.). — 17. Grobes Zeug (2 W). — 18. 19. Untergewand (5 W.). — 20. Der Knoten, womit das Untergewand zusammengeknüpft wird (2 W.). — 21. 22. Ein die Hälfte der Schenkel bedeckender Unterrock bei vornehmen Frauen (2 W.). — 23. Ein Unterrock bei Frauen niedern Standes. — 24. Frauenjacke (5 W.). — 25. Unterrock (2 W.). — 26. Ein Kleid zur Abwehr von Kälte und Wind. — 27. Das hintere Ende des Untergewandes, das in den Gürtel gesteckt wird (3 W.). — 28. Ein Tuch, mit dem die Schamtheile bedeckt werden (2 W.).

29 समो नक्तककर्पटो ।
30 निचोलः प्रच्छदपटो निचुलश्चोत्तरच्छदः ॥ ६७६ ॥
31 उत्सवेषु सुहृद्भिर्यद्बलादाकृष्य गृह्यते ।
32 वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकं च तद् ॥ ६७७ ॥
33 तत्तु स्यादाप्रपदीनं व्याप्नोत्याप्रपदं हि यद् ।
34 चीवरं भिक्षुसंघाटी
35 जीर्णवस्त्रं पटच्चरम् ॥ ६७८ ॥
36 शाणी गोणी छिद्रवस्त्रे
37 जलार्द्रा क्लिन्नवाससि ।
38 पर्यस्तिका परिकरः पर्यङ्कश्चावसक्थिका ॥ ६७९ ॥
39 कुथे वर्णः परिस्तोमः प्रवेणीनवतास्तराः ।
40 अपटी काण्डपटः स्यात्प्रतिसीरा जवन्यपि ॥ ६८० ॥
41 तिरस्करि-
42 ण्यथोल्लोचो वितानं कदकोऽपि च ।
43 चन्द्रोदये

29. Tuch (2 W.). — 30. Ueberwurf (4 W.). — 31. 32. Kleider, Kränze u. s. w., welche Freunde bei Festen mit Gewalt an sich reissen und davontragen (2 W.). — 33. Ein Gewand, welches bis auf die Fussspitzen reicht. — 34. Bettlergewand (2 W.). — 35. Abgetragenes Kleid. — 36. Kleid mit Löchern (2 W.). — 37. Durchnässtes Kleid. — 38. Ein Tuch, welches beim Sitzen über die Lenden geworfen wird (4 W.). — 39. Eine Decke, welche über den Rücken eines Elephanten, Pferdes, über einen Wagen u. s. w. gebreitet wird (6 W.). — 40. 41. Ein Schirm, der ein Zelt umgiebt (5 W.). — 42. 43. Traghimmel (4 W.).

44 स्थूलं दूष्ये
45 केणिका पटकुट्यपि ॥ ६८१ ॥
46 गुणालयनिकायां स्या-
47 त्संस्तरप्रस्तरौ समौ ।
48 तल्पं शय्या शयनीयं शयनं तलिमं च तद् ॥ ६८२ ॥
49 मञ्चमञ्चकपर्यङ्कपल्यङ्काः खट्वया समाः ।
50 उच्छीर्षकमुपाधानबर्हौ
51 पाले पतद्ग्रहः ॥ ६८३ ॥
52 प्रतिग्राहो
53 मकुरात्मदर्शादर्शास्तु दर्पणे ।
54 स्याद्वेत्रासनमासन्दी
55 विष्टरः पीठमासनम् ॥ ६८४ ॥
56 कसिपुर्भोजनाच्छादा-
57 वौशीरं शयनासने ।
58 लाक्षा द्रुमामयो राक्षा रङ्गमाता पलंकषा ॥ ६८५ ॥
59 जतु क्षतघ्ना कृमिजा
60 यावालक्तौ तु तद्रसः ।
61 अञ्जनं कज्जलं

44. Haus aus Zeug (2 W.). — 45. 46. Zelt (3 W.). — 47. Streu (2 W.). — 48. Lager (5 W.). — 49. Bettstelle (5 W.). — 50. Kopfkissen (3 W.). — 51. 52. Spucknapf (3 W.). — 53. Spiegel (4 W.). — 54. Stuhl aus Rohr (2 W.). — 55. Sitz (3 W.). — 56. Kost und Kleidung. — 57. Sitzend schlafen. — 58. 59. Cochenille (8 W.). — 60. Saft der Cochenille (2 W.). — 61. Collyrium (2 W.).

62 दीपः प्रदीपः कज्जलध्वजः ॥ ६८६ ॥
63 स्नेहप्रियो गृहमणिर्दशाकर्षो दशेन्धनः ।
64 व्यजनं तालवृन्तं
65 तद्वित्रं मृगचर्मणा ॥ ६८७ ॥
66 आलावर्तं तु वस्त्रस्य
67 कङ्कतः केशमार्जनः ।
68 प्रसाधनश्चा-
69 थ बालक्रीडनके गुडो गिरिः ॥ ६८८ ॥
70 गिरियको गिरिगुडः
71 समौ कन्दुकगेन्दुकौ ।
72 राजा राट्पृथिवीशक्रमध्यलोकेशभूभृतः ॥ ६८९ ॥
73 महीक्षित्पार्थिवो मूर्धाभिषिक्तो भूप्रजानृपः ।
74 मध्यमो मण्डलाधीशः
75 सम्राट् शास्ति यो नृपान् ॥ ६९० ॥
76 यः सर्वमण्डलस्येशो राजसूयं च यो ऽयजत् ।
77 चक्रवर्ती सार्वभौम-
78 स्ते तु द्वादश भारते ॥ ६९१ ॥

62. 63. Lampe (7 W.). — 64. Fächer (2 W.). — 65. Fächer aus Hirschleder. — 66. Fächer aus Zeug. — 67. 68. Kamm (3 W.). — 69. 70. Ball zum Spielen (5 W.). — 71. Hölzerner Ball (2 W.). — 72. 73. König (11 W.). — 74. Untergeordneter Regent, Beherrscher einer Provinz (2 W.). — 75. 76. Herrscher, welcher über Könige gebietet, das ganze Land beherrscht und das Râg'asûja-Opfer vollzogen hat. — 77. Oberherrscher, Beherrscher eines Welttheils (2 W.). — 78. Es sind im Lande Bhârata (Indien) zwölf Oberherrscher gewesen.

79 आर्षभिर्भरतस्तत्र

80 सगरस्तु सुमित्रभूः ।

81 मघवा वैजयि-

82 रथाश्वसेननृपनन्दनः ॥ ६९२ ॥

83 सनत्कुमारो

84 ऽथ शान्तिः कुन्थुररो जिना अपि ।

85 सुभूमस्तु कार्तवीर्यः

86 पद्मः पद्मोत्तरात्मजः ॥ ६९३ ॥

87 हरिषेणो हरिसुतो

88 जयो विजयनन्दनः ।

89 ब्रह्मसूनुर्ब्रह्मदत्तः

90 सर्वे ऽपीक्ष्वाकुवंशजाः ॥ ६९४ ॥

91 प्राजापत्यस्त्रिपृष्ठो

92 ऽथ द्विपृष्ठो ब्रह्मसंभवः ।

93 स्वयंभू रुद्रतनयः

94 सोमभूः पुरुषोत्तमः ॥ ६९५ ॥

95 शैवः पुरुषसिंहो

79. Der erste Oberherrscher in Bhârata (2 W.). — 80. Der zweite (2 W.). — 81. Der dritte (2 W.). — 82. 83. Der vierte (2 W.). — 84. Der fünfte, sechste und siebente, welche zugleich Arhant's waren. — 85. Der achte (2 W.). — 86. Der neunte (2 W.). — 87. Der zehnte (2 W.). — 88. Der elfte (2 W.). — 89. Der zwölfte (2 W.) — 90. Alle zwölf stammen aus dem Geschlechte Ikshvâku's. — 91—1. Die 9 schwarzen Vâsudeva's. — 91. Der erste (2 W.). — 92. Der zweite (2 W.). — 93. Der dritte (2 W.). — 94. Der vierte (2 W.). — 95. Der fünfte (2 W.).

96 ऽथ महाशिरःसमुद्भवः ।
97 स्यात्पुरुषपुण्डरीको
98 दत्तो ऽग्निसिंहनन्दनः ॥ ६९६ ॥
99 नारायणो दाशरथिः
1 कृष्णस्तु वसुदेवभूः ।
2 वासुदेवा अमी कृष्णा नव शुक्ला बलास्त्वमी ॥ ६९७ ॥
3 अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः ।
4 आनन्दो नन्दनः पद्मो रामो
5 विष्णुद्विषस्त्वमी ॥ ६९८ ॥
6 अश्वग्रीवस्तारकश्च मेरको मधुरेव च ।
7 निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः ॥ ६९९ ॥
8 जिनैः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी ।
9 आदिराजः पृथुर्वैन्यो
10 मान्धाता युवनाश्वजः ॥ ७०० ॥
11 धुन्धुमारः कुवलाश्वो
12 हरिश्चन्द्रस्त्रिशङ्कुजः ।
13 पुरूरवा बौध ऐल उर्वशीरमणश्च सः ॥ ७०१ ॥

96. 97. Der sechste (2 W.). — **98.** Der siebente (2 W.). — **99.** Der achte (2 W.). — **1.** Der neunte (2 W.). — **2—4.** Dies sind die 9 schwarzen Vâsudeva's, die 9 weissen Bala's sind: Ak'ala u. s. w. — **5—7.** Die 9 Vishṇudvish oder Feinde der Vâsudeva's sind: Açvagrîva u. s. w. — **8.** Diese, mit den 24 Arhant's (s. Str. 26—28.) 63 an der Zahl, heissen Çalâkâ-purusha's. — **9.** Pṛthu (3 W.). — **10—15.** Namen von 6 Oberherrschern. — **10.** Mândhâtar (2 W.). — **11.** Dhundhumâra (2 W.). — **12.** Hariçk'andra (2 W.). — **13.** Purûravas (4 W.).

14 दौष्यन्तिर्भरतः सर्वदमः शकुन्तलात्मजः ।
15 हैहयस्तु कार्तवीर्यो दोःसहस्रभृदर्जुनः ॥ ७०२ ॥
16 कौशल्यानन्दनो दाशरथी रामो
17 ऽस्य तु प्रिया ।
18 वैदेही मैथिली सीता जानकी धरणीसुता ॥ ७०३ ॥
19 रामपुत्रौ कुशलवा-
20 वेकयोक्त्या कुशीलवौ ।
21 सौमित्रिर्लक्ष्मणो
22 वाली वालिरिन्द्रसुतश्च सः ॥ ७०४ ॥
23 आदित्यसूनुः सुग्रीवो
24 हनुमान्वज्रकङ्कटः ।
25 मारुतिः केशरिसुत आञ्जनेयो ऽर्जुनध्वजः ॥ ७०५ ॥
26 पौलस्त्यो रावणो रक्षोलङ्केशो दशकंधरः ।
27 रावणिः शक्रजिन्मेघनादो मन्दोदरीसुतः ॥ ७०६ ॥
28 अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः ।
29 कङ्को ऽजमीढो
30 भीमस्तु मरुत्पुत्रो वृकोदरः ॥ ७०७ ॥
31 किर्मीरकीचकबकहिडिम्बानां निसूदनः ।

14. **Bharata** (4 W.). — **15.** **Kârtavîrja** (4 W.). — **16.** **Râma** (3 W.). — **17. 18.** **Râma's Geliebte** (5 W.). — **19.** **Râma's zwei Söhne.** — **20.** Dieselben zu einer Einheit verbunden. — **21.** **Lakshmaṇa**, Râma's Bruder (2 W.). — **22.** Der Affe **Bâli** (3 W.). — **23.** Der Affe **Sugrîva** (2 W.). — **24. 25.** **Hanumant** (6 W.). — **26.** **Râvaṇa** (5 W.). — **27.** **Râvaṇa's Sohn** (4 W.). — **28. 29.** **Judhishṭhira** (6 W.). — **30. 31.** **Bhîma** (7 W.).

32 अर्जुनः फाल्गुनः पार्थः सव्यसाची धनंजयः ॥ ७०८ ॥
33 राधावेधी किरीटैन्द्रिर्जिष्णुः श्वेतहयो नरः ।
34 बृहन्नटो गुडाकेशः सुभद्रेशः कपिध्वजः ॥ ७०९ ॥
35 बीभत्सुः कर्णजि-
36 त्तस्य गाण्डीवं गाण्डिवं धनुः ।
37 पाञ्चाली द्रौपदी कृष्णा सैरंध्री नित्ययौवना ॥ ७१० ॥
38 वेदिजा याज्ञसेनी च
39 कर्णश्चम्पाधिपोऽङ्गराट् ।
40 राधासूतार्कतनयः
41 कालपृष्ठं तु तद्धनुः ॥ ७११ ॥
42 श्रेणिकस्तु भम्भासारो
43 हालः स्यात्सातवाहनः ।
44 कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः ॥ ७१२ ॥
45 मृतस्वमोक्ता धर्मात्मा मारिव्यसनवारकः ।
46 राजबीजी राजवंश्यो
47 बीज्यवंश्यो तु वंशजे ॥ ७१३ ॥
48 स्वाम्यमात्यः सुहृत्कोशो राष्ट्रदुर्गबलानि च ।

32—35. **Arǵuna** (17 W.). — 36. **Arǵuna's** Bogen (2 W.). — 37. 38. **Draupadî** (7 W.). — 39. 40. **Karṇa** (6 W.). — 41. **Karṇa's** Bogen. — 42. **Çreṇika**, ein König von **Magadha** (2 W.). — 43. **Sâtavâhana** (2 W.). — 44. 45. **Kumârapâla** (7 W.). — 46. Von königlichem Geschlecht (2 W.). — 47. Aus einem Geschlecht stammend (am Ende eines Comp.) (2 W.). — 48. 49. Die Glieder eines Reichs; der König, der Minister, der Bundesgenosse, der Schatz, das Territorium, die Festungen, die Armee und die Bürgerschaft.

49 राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥ ७१४ ॥
50 तन्त्रं स्वराष्ट्रचिन्ता स्या-
51 दावापस्त्वरिचिन्तनम् ।
52 परिस्पन्दः परिकरः परिवारः परिग्रहः ॥ ७१५ ॥
53 परिच्छदः परिबर्हस्तन्त्रोपकरणे अपि ।
54 राजशय्या महाशय्या
55 भद्रासनं नृपासनम् ॥ ७१६ ॥
56 सिंहासनं तु तद्धैमं
57 छत्रमातपवारणम् ।
58 चामरं बालव्यजनं रोमगुच्छः प्रकीर्णकम् ॥ ७१७ ॥
59 स्थगी ताम्बूलकरङ्को
60 भृङ्गारः कनकालुका ।
61 भद्रकुम्भः पूर्णकुम्भः
62 पादपीठं पदासनम् ॥ ७१८ ॥
63 अमात्यः सचिवो मन्त्री धीसखः सामवायिकः ।
64 नियोगी कर्मसचिव आयुक्तो व्यापृतश्च सः ॥ ७१९ ॥
65 द्रष्टा तु व्यवहाराणां प्राड्विवाकोऽक्षदर्शकः ।
66 महामात्राः प्रधानानि

50. Die Sorge um das eigene Reich. — **51.** Die Anstalten gegen den Feind. — 52. **53.** Tross, Gefolge (8 W.). — **54.** Königliches Ruhebett (2 W.). — 55. Thron (2 W.). — **56.** Goldener Thron. — **57.** Sonnenschirm (2 W.). — **58.** Fliegenwedel (4 W.). — **59.** Betel-Büchse (2 W.). — **60.** Goldene Vase (2 W.). — **61.** Goldene Vase mit geheiligtem Wasser (2 W.). — **62.** Fussbank (2 W.). — **63.** Minister (5 W.). — **64.** Beamter (4 W.). — **65.** Richter (2 W.). — **66.** Die ersten Räthe des Königs (2 W.).

67 पुरोधास्तु पुरोहितः ॥ ७२० ॥

68 सौवस्तिको

69 ऽथ द्वारस्थः क्षत्ता स्याद्द्वारपालकः ।

70 दौवारिकः प्रतीहारो वेत्र्युत्सारकदण्डिनः ॥ ७२१ ॥

71 रक्षिवर्गो ऽनीकस्थः स्या-

72 दध्यक्षाधिकृतौ समौ ।

73 पौरोगवः सूदाध्यक्षः

74 सूदस्त्वौदनिको गुणः ॥ ७२२ ॥

75 भक्तकारः सूपकारः सूपारालिकवल्लवाः ।

76 भौरिकः कनकाध्यक्षो

77 रूप्याध्यक्षस्तु नैष्किकः ॥ ७२३ ॥

78 स्थानाध्यक्षः स्थानिकः स्या-

79 च्छुल्काध्यक्षस्तु शौल्किकः ।

80 शुल्कस्तु घट्टादिदेयं

81 धर्माध्यक्षस्तु धार्मिकः ॥ ७२४ ॥

82 धर्माधिकरणी चा-

83 थ हट्टाध्यक्षो ऽधिकर्मिकः ।

84 चतुरङ्गबलाध्यक्षः सेनानीर्दण्डनायकः ॥ ७२५ ॥

67. 68. Hauspriester des Königs (3 W.). — 69. 70. Thürst (8 W.). — 71. Leibwache. — 72. Oberaufseher (2 W.). — Oberaufseher über die Küche (2 W.). — 74. 75. Koch (8 W.). 76. Oberaufseher über das Gold (2 W.). — 77. Münzmeister (2 W.) 78. Gouverneur eines Bezirks (2 W.). — 79. Oberaufseher über Zoll (2 W.). — 80. Zoll. — 81. 82. Oberrichter (3 W.). — Oberaufseher über die Märkte (2 W.). — 84. Oberbefehlshaber Truppen (3 W.).

85 स्थायुको ऽधिकृतो ग्रामे
86 गोपो ग्रामेषु भूरिषु ।
87 स्यातामन्तःपुराध्यक्षे ऽन्तर्वंशिकावरोधिकौ ॥ ७२६ ॥
88 शुद्धान्तः स्यादन्तःपुरमवरोधो ऽवरोधनम् ।
89 सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ७२७ ॥
90 षण्डे वर्षवरः
91 शत्रौ प्रतिपक्षः परो रिपुः ।
92 शात्रवः प्रत्यवस्थाता प्रत्यनीको ऽभियात्यरी ॥ ७२८ ॥
93 दस्युः सपत्नो ऽसहनो विपक्षो द्वेषी द्विषन्वैर्यहितो जिघांसुः ।
94 दुर्हृत्परः पन्थकपन्थिनौ द्विड्द्रुह्यर्थ्यमित्रावभिमात्यरातौ ॥ ७२९ ॥
95 वैरं विरोधो विद्वेषो
96 वयस्यः सवयाः सुहृद् ।
97 स्निग्धः सहचरो मित्रं सखा
98 सख्यं तु सौहृदम् ॥ ७३० ॥
99 सौहार्दं साप्तपदीनमैत्र्यजर्याणि संगतम् ।
1 आनन्दनं त्वाप्रच्छन्नं स्यात्सभाजनमित्यपि ॥ ७३१ ॥
2 विषयानन्तरो राजा शत्रु-
3 र्मित्रमतः परम् ।

85. Vorsteher eines Dorfes. — 86. Vorsteher mehrerer Dörfer. — 87. Aufseher des Gynaeceums (2 W.). — 88. Gynaeceum, Harem (4 W.). — 89. Die Wächter des Harems (4 W.). — 90. Eunuch (2 W.). — 91 – 94. Feind (26 W.). — 95. Feindschaft (3 W.). — 96. 97. Freund (7 W.). — 98. 99. Freundschaft (7 W.). — 1. Freundlicher Empfang, Gruss, Umarmung u. s. w. (3 W.). — 2. König eines angränzenden Landes. — 3. König eines ferner liegenden Landes.

4 उदासीनः परतरः

5 पार्ष्णिग्राहस्तु पृष्ठतः ॥ ७३२ ॥

6 अनुवृत्तिस्त्वनुरोधो

7 हेरिको गूढपूरुषः ।

8 प्रणिधिर्यथार्हवर्णो ऽवसर्पो मन्त्रविच्चरः ॥ ७३३ ॥

9 वार्त्तायनः स्पशश्चार

10 आप्तप्रत्ययितौ समौ ।

11 सत्त्रिणि स्याद्गृहपति-

12 दूतः संदेशहारकः ॥ ७३४ ॥

13 संधिविग्रहयानान्यासनद्वैधाश्रया अपि ।

14 षड्गुणाः

15 शक्तयस्तिस्रः प्रभुत्वोत्साहमन्त्रजाः ॥ ७३५ ॥

16 सामदानभेददण्डा उपायाः

17 साम सान्त्वनम् ।

18 उपजापः पुनर्भेदो

4. König eines noch weiter liegenden Landes. — 5. König eines im Rücken liegenden Landes. — 6. Willfahrung (2 W.). — 7—9. Spion, Kundschafter (10 W.). — 10. Zuverlässig (2 W.). — 11. Haushalter (2 W.). — 12. Bote (2 W.). — 13. 14. Friede, Krieg, Feldzug, Waffenstillstand, Theilung der Streitkräfte und sich in den Schutz des Mächtigeren begeben: dies sind die sechs politischen Zustände eines Königs. — 15. Die drei Kräfte eines Königs beruhen auf seiner Macht, seiner Ausdauer und auf gutem Rath. — 16. Unterhandlung, Geschenke, Trennung zweier Bundesgenossen und offene Gewalt sind seine Mittel. — 17. Unterhandlung (2 W.). — 18. Trennung zweier Bundesgenossen (2 W.).

19 दण्डं स्यात्साहसं दमः ॥ ७३६ ॥
20 प्राभृतं ढौकनं लञ्चोत्कोचः कौशलिकामिषे ।
21 उपाचारः प्रदानं दा हारो ग्राह्यायने अपि ॥ ७३७ ॥
22 मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रयः ।
23 मृगयाक्षाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे ॥ ७३८ ॥
24 दण्डपारुष्यमित्येद्धेयं व्यसनसप्तकम् ।
25 पौरुषं विक्रमः शौर्यं शौण्डीर्यं च पराक्रमः ॥ ७३९ ॥
26 यत्कोषदण्डजं तेजः स प्रभावः प्रतापवत् ।
27 भिया धर्मार्थकामैश्च परीक्षा या तु सोपधा ॥ ७४० ॥
28 तन्मन्त्राद्यषडक्षीणं यत्तृतीयाद्यगोचरः ।
29 रहस्यालोचनं मन्त्रो
30 रहश्छन्नमुपह्वरम् ॥ ७४१ ॥
31 विविक्तविजनैकान्तनिःशलाकानि केवलम् ।
32 गुह्ये रहस्यं
33 न्यायस्तु देशरूपं समञ्जसम् ॥ ७४२ ॥
34 कल्पाभ्रेषौ नयो

19. Offene Gewalt (3 W.). — 20. 21. Geschenk (12 W.). — 22. Die drei kleineren Mittel (3 Arten von Kriegslist). — 23. 24. Jagd, Würfelspiel, Hurerei, Trunk, harte Rede, Verletzung fremden Eigenthums und grausames Strafen sind die 7 zu meidenden Laster. — 25. Tapferkeit (5 W.). — 26. Ansehen, welches aus Reichthum und Macht entspringt. — 27. Erwägung, wobei Furcht, Recht, Nutzen und Annehmlichkeit in Betracht kommen. — 28. Berathschlagung zu Zweien. — 29. Geheime Berathung. — 30. 31. Geheim (8 W.). — 32. Geheimniss (2 W.). — 33. 34. Schicklichkeit, Zweckmässigkeit (6 W.).

35 न्याय्यं तूचितं युक्तसांप्रते ।
36 लभ्यं प्राप्तं भजमानाभिनीतौपयिकानि च ॥ ७४३ ॥
37 प्रक्रिया त्वधिकारो
38 ऽथ मर्यादा धारणा स्थितिः ।
39 संस्था-
40 पराधस्तु मन्तुर्व्यलीकं विप्रियागसी ॥ ७४४ ॥
41 बलिः करो भागधेयो
42 द्विपाद्यो द्विगुणो दमः ।
43 वाहिनी पृतना सेना बलं सैन्यमनीकिनी ॥ ७४५ ॥
44 कटकं ध्वजिनी तन्त्रं दण्डो ऽनीकं पताकिनी ।
45 वरूथिनी चमूश्चक्रं स्कन्धावारो
46 ऽस्य तु स्थितिः ॥ ७४६ ॥
47 शिविरं
48 रचना तु स्याद्व्यूहो दण्डादिको युधि ।
49 प्रत्यासारो व्यूहपार्ष्णिः
50 सैन्यपृष्ठे प्रतिग्रहः ॥ ७४७ ॥
51 एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
52 सेना सेनामुखं गुल्मो वाहिनी पृतना चमूः ॥ ७४८ ॥
53 अनीकिनी च पत्तेः स्यादिभाद्यैस्त्रिगुणैः क्रमात् ।

35. 36. Schicklich (9 W.). — 37. Vorrecht? (2 W.). — 38. 39. Beharrlichkeit (4 W.). — 40. Unrecht (5 W.). — 41. Abgabe (3 W.). — 42. Doppelte Strafe. — 43—45. Heer (16 W.). — 46. 47. Lager. — 48. Schlachtordnung in Kolonnen u. s. w. — 49. Nachtrab. — 50. Reserve. — 51. Eine Schaar, bestehend aus einem Elephanten, einem Wagen, 3 Pferden und 5 Fussgängern. — 52. 53. Sieben verschiedene Heeresabtheilungen, von denen jede nachfol-

54 दशानीकिन्योऽक्षौहिणी

55 सज्जनं तूपरक्षणम् ॥ ७४९ ॥

56 वैजयन्ती पुनः केतुः पताका केतनं ध्वजः ।

57 अस्योच्चूलावचूलाख्यावूर्ध्वाधोमुखकूर्चकौ ॥ ७५० ॥

58 गजो वाजी रथः पत्तिः सेनाङ्गं स्याच्चतुर्विधम् ।

59 युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः ॥ ७५१ ॥

60 सः क्रीडार्थः पुष्परथो

61 देवार्थस्तु मरुद्रथः ।

62 योग्यारथो वैनयिको

63 ऽध्वरथः पारियानिकः ॥ ७५२ ॥

64 कर्णीरथः प्रवहणं डयनं रथगर्भकः ।

65 अनस्तु शकटो

66 ऽथ स्याद्गन्त्री कम्बलिवाह्यकम् ॥ ७५३ ॥

67 अथ काम्बलवास्त्राद्यास्तैस्तैः परिवृते रथे ।

68 स पाण्डुकम्बली यः स्यात्संवीतः पाण्डुकम्बलैः ॥ ७५४ ॥

gende drei Mal stärker ist als die vorhergehende. — 54. Vollständiges Heer = 10 Anîkinî. — 55. Piquet (2 W.). — 56. Banner (5 W.). – 57. 1) Ein in die Höhe stehender Büschel eines Banners. 2) Ein herabhängender. — 58. Elephant, Pferd, Wagen, Fussvolk sind die vier Bestandtheile eines Heeres. — 59. Kriegswagen (3 W.). — 60. Vergnügungswagen. — 61. Ein Wagen, in dem Götzen herumgeführt werden. — 62. Ein Wagen, den man bei kriegerischen Uebungen gebraucht (2 W.). — 63. Reisewagen. — 64. Eine von Männern auf den Schultern getragene Sänfte (4 W.). — 65. Karren (2 W.). — 66. Ein von Ochsen gezogener Wagen (2 W.). — 67. Ein mit einer wollenen Decke, mit Zeug u. s. w. bezogener Wagen (2 W.). — 68. Ein mit weissen wollenen Decken bezogener Wagen.

69 स तु द्वैपो वैयाघ्रश्च यो वृतो द्वीपचर्मणा ।

70 रथाङ्गं रथपादो ऽरि चक्रं

71 धारा पुनः प्रधिः ॥ ७५५ ॥

72 नेमि-

73 रक्षाग्रकीले त्वण्याणी

74 नाभिस्तु पिण्डिका ।

75 युगंधरं कूवरं स्या-

76 द्युगमीशान्तबन्धनम् ॥ ७५६ ॥

77 युगकीलकस्तु शम्या

78 प्रासङ्गस्तु युगान्तरम् ।

79 अनुकर्षो दार्वधःस्थं

80 धूर्वौ यानमुखं च धूः ॥ ७५७ ॥

81 रथगुप्तिस्तु वरूथो

82 रथाङ्गानि त्वपस्कराः ।

83 शिविका याप्ययाने

84 ऽथ दोला प्रेङ्खादिका भवेत् ॥ ७५८ ॥

69. Ein mit einem Tiegerfell bezogener Wagen (2 W.). — 70. Rad (4 W.). — 71. 72. Umkreis eines Rades (3 W.). — 73. Bolzen am Ende der Axe (3 W.). — 74. Nabe (2 W.). — 75. Deichsel (2 W.). — 76. Joch. — 77. Pflock am Joch (2 W.) — 78. Art Joch, welches jungen Stieren angelegt wird. — 79. Boden eines Wagens. — 80. Vorderseite des Wagens, an welche die Pferde oder Stiere angebunden werden (3 W.). — 81. Schutzbrett eines Wagens (2 W.). — 82. Die Theile eines Wagens, wie Rad u. s. w. — 83. Krankenwagen oder Sänfte (2 W.). — 84. Hängematte, Schaukel u. s. w.

85 वैनीतकं परंपरावाहनं शिबिकादिकम् ।
86 यानं युग्यं पत्त्रं वाह्यं वह्यं वाहनधोरणे ॥ ७५९ ॥
87 नियन्ता प्राजिता यन्ता सूतः सव्येष्ठसारथी ।
88 दक्षिणस्थप्रवेतारौ क्षत्ता रथकुटुम्बिकः ॥ ७६० ॥
89 रथारोहिणि तु रथी
90 रथिके रथिरो रथी ।
91 अश्वारोहे त्वश्ववारः सादी च तुरगी च सः ॥ ७६१ ॥
92 हस्त्यारोहे सादियन्तृमहामात्रनिषादिनः ।
93 आधोरणा हस्तिपका गजाजीवेधपालकाः ॥ ७६२ ॥
94 योद्धारस्तु भटा योधाः
95 सेनारक्षास्तु सैनिकाः ।
96 सेनायां ये समवेतास्ते सैन्याः सैनिका अपि ॥ ७६३ ॥
97 ये सहस्रेण योद्धारस्ते साहस्राः सहस्रिणः ।
98 छायाकरश्छत्रधारः
99 पताकी वैजयन्तिकः ॥ ७६४ ॥
1 परिधिस्थः परिचर

85. Krankenwagen u. s. w., bei dem die Träger sich abwechseln. — 86. Vehikel irgend einer Art, wie Wagen, Elephant, Pferd u. s. w. (7 W.). — 87. 88. Wagenlenker (10 W.). — 89. Kämpfer zu Wagen (2 W.). — 90. Besitzer eines Wagens (3 W.). — 91. Reiter zu Pferde (4 W.). — 92. Elephantenlenker (5 W.). — 93. Elephantenwächter (4 W.). — 94. Krieger, Kämpfer (3 W.). — 95. Ausgestellte Wachen (2 W.). — 96. Soldatentrupp (2 W.). — 97. Trupp von 1000 Mann (2 W.). — 98. Sonnenschirmträger (2 W.). — 99. Fahnenträger (2 W.). — 1. Herumgehende Wache (2 W.).

2 आमुक्तः प्रतिमुक्तश्च ।
3 अपिनद्धः पिनद्धो
4 ऽथ संनद्धो व्यूढकङ्कटः ॥ ७६५ ॥
5 दंशितो वर्मितः सज्जः
6 संनाहो वर्म कङ्कटः ।
7 जगरः कवचं दंशस्तनुत्रं माठ्युरश्छदः ॥ ७६६ ॥
8 निचोलकः स्यात्कूर्पासो वारबाणश्च कञ्चुकः ।
9 सारसनं त्वधिकाङ्गं हृदि धार्यं सकञ्चुके ॥ ७६७ ॥
10 शिरस्त्राणे तु शीर्षण्यं शिरस्कं शीर्षकं च तद् ।
11 नागोदमुदरत्राणं
12 जङ्घात्राणं तु मत्कुणम् ॥ ७६८ ॥
13 बाहुत्राणं बाहुलं स्या-
14 ज्जालिका त्वङ्गरक्षणी ।
15 जालप्रायायसी स्या-
16 दायुधीयः शस्त्रजीविनि ॥ ७६९ ॥
17 काण्डपृष्ठायुधिकौ च
18 तुल्यौ प्रासिककौन्तिकौ ।
19 पारश्वधिकस्तु पारश्वधः परश्वधायुधः ॥ ७७० ॥

2. 3. Gekleidet, gerüstet (4 W.). — 4. 5. Mit einer Rüstung bekleidet (5 W.). — 6. 7, Rüstung (9 W.). — 8. Panzer (4 W.). — 9, Eine Schärpe, die auf der Brust über dem Panzer getragen wird (2 W.). — 10. Helm (4 W.). — 11. Panzer, der auf dem Bauch getragen wird (2 W.). — 12 Beinschiene (2 W.). — 13. Armschiene (2 W.). — 14. 15. Eisernes Netz als Rüstung (4 W.). — 16. 17. Soldat (4 W.). — 18. Wurfspiess-Kämpfer (2 W.). — 19. Axt-Kämpfer (3 W.).

20 स्युर्नैस्त्रिंशिकशाक्तीकयाष्टीकास्तत्तदायुधाः ।

21 तूणी धनुर्भृद्धानुष्कः

22 स्यात्काण्डीरस्तु काण्डवान् ॥ ७७१ ॥

23 कृतहस्तः कृतपुङ्खः सुप्रयुक्तशरो हि यः ।

24 शीघ्रवेधी लघुहस्तो

25 ऽपराद्धेषुस्तु लक्ष्यतः ॥ ७७२ ॥

26 च्युतेषु-

27 दूरवेधी तु दूरापा-

28 त्यायुधं पुनः ।

29 हेतिः प्रहरणं शस्त्रमस्त्रं

30 तच्च चतुर्विधम् ॥ ७७३ ॥

31 मुक्तं द्विधा पाणियन्त्रमुक्तं शक्तिशरादिकम् ।

32 अमुक्तं शस्त्रिकादि स्या-

33 द्गदाद्यं तु द्वयात्मकम् ॥ ७७४ ॥

34 धनुश्चापो ऽस्त्रमिष्वासः कोदण्डं धन्व कार्मुकम् ।

20. 1) Schwert-Kämpfer, 2) Lanzenträger, 3) Keulen-Kämpfer. — 21. Bogenträger (3 W.). — 22. Mit Pfeilen bewaffnet (2 W.). — 23. Im Bogenschiessen geübt (2 W.). — 24. Schneller Bogenschütze (2 W.). — 25. 26. Ein Bogenschütze, der immer das Ziel verfehlt. — 27. Einer, der in der Ferne sein Ziel trifft (2 W.). — 28. 29. Waffe (5 W.). — 30. Eine solche ist von vierfacher Art. — 31. Eine geworfene Waffe ist von zweierlei Art, indem sie unmittelbar mit der Hand (wie z. B. der Speer) oder vermittelst eines Instruments (wie z. B. der Pfeil vermittelst des Bogens) geworfen werden kann. — 32. Eine nicht-geworfene Waffe ist das Schwert u. s. w. — 33. Die Keule u. s. w. wird auf doppelte Art gebraucht. — 34. 35. Bogen (9 W.).

35 द्रुणासो

36 लस्तको ऽस्यान्त-

37 रग्रं वर्त्तिरटन्यपि ॥ ७७५ ॥

38 मौर्वी जीवा गुणो गव्या शिञ्जा बाणासनं द्रुणा ।

39 शिञ्जिनी ज्या च

40 गोधा तु तलं ज्याघातवारणम् ॥ ७७६ ॥

41 स्थानान्यालीढवैशाखप्रत्यालीढानि मण्डलम् ।

42 समपादं च

43 वेध्यं तु लक्ष्यं लक्षं शरव्यकम् ॥ ७७७ ॥

44 बाणो पृषत्कविशिखौ खगगार्धपत्रौ काण्डाशुगप्रदरसायकपत्रवाहाः ।

45 पत्रीषुजिह्मगशिलीमुखकङ्कपत्ररोपाः कलम्बशरमार्गणचित्रपुङ्खाः ॥ ७७८ ॥

46 प्रक्ष्वेडनः सर्वलौहो नाराच एषणश्च सः ।

47 निरस्तः प्रहितो

48 बाणो विषाक्ते दिग्धलिप्तकौ ॥ ७७९ ॥

49 बाणमुक्तिर्व्यवच्छेदो

50 दीप्तिर्वेगस्य तीव्रता ।

51 क्षुरप्रभल्लार्धेन्दुतीरीमुख्यास्तु तद्भिदः ॥ ७८० ॥

36. Die Mitte des Bogens. — **37.** Das Ende des Bogens (2 W.). — **38. 39.** Sehne (9 W.). — **40.** Ein Stück Leder, welches den linken Arm vor dem Schlag der Sehne schützt (2 W.). — **41. 42.** Fünf verschiedene Stellungen beim Schiessen. — **43.** Ziel (4 W.). — **44. 45.** Pfeil (20 W.). — **46.** Eiserner Pfeil (4 W.). — **47.** Abgeschossen. — **48.** Vergifteter Pfeil (2 W.). — **49.** Abschiessen eines Pfeils. — **50.** Der schnelle Flug eines Pfeils. — **51.** Vier verschiedene Pfeilarten.

52 पक्षो वाजः

53 पत्त्रणा तन्न्यासः

54 पुङ्खस्तु कर्तरी ।

55 तूणो निषङ्गस्तूणीर उपासङ्गः शराश्रयः ॥ ७८१ ॥

56 शरधिः कलापो ऽ

57 प्यथ चन्द्रहासः करवालनिस्त्रिंशकृपाणखड्गाः ।

58 तरवारिकौक्षेयकमण्डलाग्रा असिर्ऋष्टिरिष्टी

59 त्सरुरस्य मुष्टिः ॥ ७८२ ॥

60 प्रत्याकारः परीवारः कोषः खड्गपिधानकम् ।

61 अड्डनं फलकं चर्म खेटकावरणस्फराः ॥ ७८३ ॥

62 अस्य मुष्टिस्तु संग्राहः

63 क्षुरी छुरी कृपाणिका ।

64 शस्त्र्यसेर्धेनुपुत्र्यौ च

65 पत्त्रपालस्तु सायता ॥ ७८४ ॥

66 दण्डो यष्टिश्च लगुडः

67 स्यादीली करवालिका ।

68 भिन्दिपाले सृगः

69 कुन्ते प्रासो

52. Feder eines Pfeils (2 W.). — 53. Das Befestigen der Federn. — 54. Pfeilspitze (2 W.). — 55. 56. Köcher (7 W.). — 57. 58. Schwert (11 W.). — 59. Griff eines Schwertes. — 60. Scheide (4 W.). — 61. Schild (6 W.). — 62. Griff eines Schildes. — 63. 64. Dolch (6 W.). — 65. Langer Dolch. — 66. Stock (3 W.). — 67. Kurzes einschneidiges Schwert (2 W.). — 68. Wurfspiess (2 W.). — 69. Wurfspiess anderer Art (2 W.).

70 ऽथ द्रुघणो घनः ॥ ७८५ ॥
71 मुद्गरः स्या-
72 त्कुठारस्तु परशुः पर्शुपर्श्वधौ ।
73 परश्वधः स्वधितिश्च
74 परिघः परिघातनः ॥ ७८६ ॥
75 सर्वला तोमरे
76 शल्यं शङ्कौ
77 शूले त्रिशीर्षकम् ।
78 शक्तिपट्टिसदुःस्फोटचक्राद्याः शस्त्रजातयः ॥ ७८७ ॥
79 खुरली तु श्रमो योग्याभ्यास-
80 स्तद्भूः खलूरिका ।
81 सर्वाभिसारः सर्वौघः सर्वसंनहनं समाः ॥ ७८८ ॥
82 लोहाभिसारो दशम्यां विधिर्नीराजनात्परः ।
83 प्रस्थानं गमनं व्रज्याभिनिर्याणं प्रयाणकम् ॥ ७८९ ॥
84 यात्रा-
85 भिषेणनं तु स्यात्सेनयाभिगमो रिपौ ।

70. 71. Hammerähnliche Waffe (3 W.). — 72. 73. Beil (6 W.). — 74. Mit Eisen beschlagener Stock (2 W.). — 75. Kolben, Keule (2 W.). — 76. Spiess (2 W.). — 77. Dreizack (2 W.). — 78. Speer, Axt, duhsphoṭa, Discus u. s. w. sind verschiedene Arten von Waffen. — 79. Waffenübung (4 W.). — 80. Uebungsplatz. — 81. Versammlung eines ganzen Heeres (3 W.). — 82. Kriegerische Ceremonie, welche am zehnten Monatstage nach dem Nirâg'ana vorgenommen wird. — 83. 84. Marsch (6 W.). — 85. Mit dem Heere auf den Feind losgehen.

86 स्यात्सुहृद्बलमासारः

87 प्रचक्रं चलितं बलम् ॥ ७६० ॥

88 प्रसारस्तु प्रसरणं तृणकाष्ठादिहेतवे ।

89 अभिक्रमो रणे यानमभीतस्य रिपून्प्रति ॥ ७६१ ॥

90 अभ्यमित्त्र्यो ऽभ्यमित्त्रीयो ऽभ्यमित्त्रीणो ऽभ्यरि व्रजन् ।

91 स्यादुरस्वानुरसिल

92 ऊर्जस्व्यूर्जस्वलौ समौ ॥ ७६२ ॥

93 सांयुगीनो रणे साधु-

94 र्जेता जिष्णुश्च जित्वरः ।

95 जय्यो यः शक्यते जेतुं

96 जेयो जेतव्यमात्रके ॥ ७६३ ॥

97 वैतालिका बोधकरा अर्थिकाः सौखसुप्तिकाः ।

98 घाण्टिकाश्चाक्रिकाः

99 सूतो वन्दी मङ्गलपाठकः ॥ ७६४ ॥

1 मागधो मगधः

2 संशप्तका युद्धानिवर्त्तिनः ।

86. Das Heer eines Bundesgenossen. — 87. Ziehendes Heer. — 88. Zug nach Futter, Holz u. s. w. (2 W.) — 89. Angriff. — 90. Muthig im Angriff (3 W.). — 91. Eine starke Brust habend (2 W.). — 92. Kräftig (2 W.). — 93. Tapfer in der Schlacht. — 94. Siegreich (3 W.). — 95. Der besiegt werden kann. — 96. Der besiegt werden soll. — 97. Barden, welche das Amt haben, den Fürsten aufzuwecken (4 W.). — 98. Barden, Sänger (2 W.). — 99. Herold, Panegyrist (3 W.). — 1. Ein in der Genealogie bewanderter Barde (2 W.). — 2. Krieger, die geschworen haben, niemals fliehen zu wollen.

3 नग्नः स्तुतिव्रत-

4 स्तस्य ग्रन्थो भोगावली भवेत् ॥ ७९५ ॥

5 प्राणाः स्थाम तरः पराक्रमबलद्युम्नानि शौर्योजसी

6 शुष्मं शुष्म च शक्तिरूर्जसहसी

7 युद्धं तु संख्यं कलिः ।

8 संग्रामाहवसंप्रहारसमरा जन्यं युदायोधनं

9 संस्फोटः कलहो मृधं प्रहरणं संयद्रणो विग्रहः ॥ ७९६ ॥

10 द्वंद्वं समाघातसमाह्वयाभिसंपातसंमर्दसमित्प्रघाताः ।

11 आस्कन्दनाजिप्रधनान्यनीकमभ्यागमश्च प्रविदारणं च ॥ ७९७ ॥

12 समुदायः समुदयो राटिः समितिसंगरौ ।

13 अभ्यामर्दः संपरायः समीकं सांपरायिकम् ॥ ७९८ ॥

14 आक्रन्दः संयुगं चा-

15 थ नियुद्धं तद्भुजोद्भवम् ।

16 पटहाडम्बरौ तुल्यौ

17 तुमुलं रणसंकुलम् ॥ ७९९ ॥

18 नासीरं त्वग्रयानं स्या-

19 दवमर्दस्तु पीडनम् ।

20 प्रपातस्त्वभ्यवस्कन्दो धाट्यभ्यासादनं च सः ॥ ८०० ॥

21 तद्रात्रौ सौप्तिकं

3. Ein das Heer begleitender Lobsänger (2 W.). — 4. Dessen Buch. — 5 6. Kraft (13 W.). — 7—14. Kampf (41 W.). — 15. Kampf mit den Armen. — 16. Schlachttrommel (2 W.). — 17. Handgemenge. — 18. Sich an die Spitze des Heeres stellen und den Feind herausfordern (2 W.). — 19. Dem Feinde Schaden zufügen (2 W.). — 20. Ueberfall (4 W.). — 21. Nächtlicher Ueberfall.

22 वीराशंसनं त्वाजिभीष्मभूः ।

23 नियुद्धभूरक्षवाटो

24 मोहो मूर्छा च कश्मलम् ॥ ८०१ ॥

25 वृत्ते भाविनि वा युद्धे पानं स्याद्वीरपाणकम् ।

26 पलायनमपयानं संद्रावद्रवविद्रवाः ॥ ८०२ ॥

27 अपक्रमः समुत्प्रेभ्यो द्रावो

28 ऽथ विजयो जयः ।

29 पराजयो रणे भङ्गो

30 डमरे डिम्बविप्लवौ ॥ ८०३ ॥

31 वैरनिर्यातनं वैरशुद्धिर्वैरप्रतिक्रिया ।

32 बलात्कारस्तु प्रसभं हठो

33 ऽथ स्खलितं छलम् ॥ ८०४ ॥

34 परापर्यभितो भूतो जितो भग्नः पराजितः ।

35 पलायितस्तु नष्टः स्याद्गृहीतदिक्तिरोहितः ॥ ८०५ ॥

36 जिताहवो जितकाशी

37 प्रस्कन्नपतितौ समौ ।

38 चारः कारा गुप्तौ

22. Der Ort, wo der Kampf am heftigsten ist. — 23. Kampfplatz für Ringer. — 24. Ohnmacht (3 W.). — 25. Der Trank, den man vor oder während der Schlacht zu sich nimmt. — 26. 27. Flucht (9 W.). — 28. Sieg (2 W.). — 29. Niederlage. — 30. Herausforderndes Geschrei (3 W.). — 31. Wiedervergeltung, Rache (3 W.). — 32. Anwendung von Gewalt (3 W.). — 33. Kriegslist (2 W.). — 34. Besiegt (6 W.). — 35. Der die Flucht ergriffen hat (4 W.). — 36. Sieger (2 W.). — 37. Gestürzt (2 W.). — 38. Gefängniss (3 W.).

39 वन्द्यां ग्रहकः प्रोपतो ग्रहः ॥ ८०६ ॥
40 चातुर्वर्ण्यं द्विजक्षत्रवैश्यशूद्रा नृणां भिदः ।
41 ब्रह्मचारी गृही वानप्रस्थो भिक्षुरिति क्रमात् ॥ ८०७ ॥
42 चत्वार आश्रमा-
43 स्तत्र वर्णी स्याद्ब्रह्मचारिणि ।
44 ज्येष्ठाश्रमी गृहमेधी गृहस्थः स्नातको गृही ॥ ८०८ ॥
45 वैखानसो वानप्रस्थो
46 भिक्षुः सांन्यासिको यतिः ।
47 कर्मन्दी रक्तवसनः परिव्राजकतापसौ ॥ ८०९ ॥
48 पाराशरी पारिकाङ्क्षी मस्करी पारिरक्षिकः ।
49 स्थाण्डिलः स्थण्डिलशायी यः शेते स्थण्डिले व्रतात् ॥ ८१० ॥
50 तपःक्लेशसहो दान्तः
51 शान्तः श्रान्तो जितेन्द्रियः ।
52 अवदानं कर्म शुद्धं

39. Gefangener (4 W.). — 40. Die vier Kasten, in welche die Menschen getheilt werden: die Brahmanen, Kshattrija's, Vaiçja's und Çûdra's — 41. 42. Der Schüler, der verheirathete Mann, der Einsiedler und der Bettler bilden der Reihe nach die 4 Lebensstufen eines Brahmanen. — 43. Der Brahmane in seinen Vorbereitungsjahren (2 W.). — 44. Der Brahmane im Ehestande (5 W.). — 45. Der Brahmane als Einsiedler (2 W.). — 46—48. Der Brahmane als Bettler (11 W.). — 49. Ein Büsser, der in Folge eines Gelübdes auf einem zum Opfer geweihten Grunde schläft (2 W.). — 50. Einer, der die Beschwerden der Büssubungen geduldig erträgt (2 W). — 51. Der die Herrschaft über seine Sinne erlangt hat (3 W.). — 52. Eine reine, erlaubte Beschäftigung.

53 ब्राह्मणास्तु त्रयीमुखाः ॥ ८११ ॥
54 भूदेवो वाडवो विप्रो द्व्यग्राभ्यां जातिजन्मजाः ।
55 वर्णज्येष्ठः सूत्रकण्ठः षट्कर्मा मुखसंभवः ॥ ८१२ ॥
56 वेदगर्भः शमीगर्भः सावित्रो मैत्र एतसः ।
57 वटुः पुनर्माणवको
58 भिक्षा स्याद्ग्रासमात्रकम् ॥ ८१३ ॥
59 उपनायस्तूपनयो वटूकरणमानयः ।
60 अग्नीन्धनं त्वग्निकार्यमाग्नीध्रा चाग्निकारिका ॥ ८१४ ॥
61 पालाशो दण्ड आषाढो व्रते
62 राम्भस्तु वैणवः ।
63 वैल्वः सारस्वतो रौच्यः
64 पैलवस्त्वौपरोधिकः ॥ ८१५ ॥
65 आश्वत्थस्तु जितनेमि-
66 रौडुम्बर उलूखलः ।
67 जटा सटा
68 वृषी पीठं

53—56. Brahmane (20 W.). — 57. Der junge Brahmane, nachdem er mit der geheiligten Schnur bekleidet worden ist (2 W.). — 58. Ein Mundvoll Speise. — 59. Bekleidung mit der geheiligten Schnur (4 W.). — 60. Die Sorge für das geheiligte Feuer (4 W.). — 61. Ein Stab aus Palâça-Holz, den ein Schüler bei einem besondern Gelübde trägt (2 W.). — 62. Desgleichen aus Bambus-Rohr (2 W.). — 63. Desgleichen aus Vilva-Holz (3 W.). — 64. Desgleichen aus Pîlu-Holz (2 W.). — 65. Desgl. aus dem Holz der *Ficus religiosa* (2 W.). — 66. Desgl. aus Udumbara-Holz (2 W.). — 67. Des Büssers Haarzopf (2 W.). — 68. Des Büssers Bank.

69 कुण्डिका तु कमण्डलुः ॥ ८१६ ॥

70 श्रोत्रियश्छान्दसो

71 यष्टा त्वादेष्टा स्याद्यज्ञव्रती ।

72 याजको यजमानश्च

73 सोमयाजी तु दीक्षितः ॥ ८१७ ॥

74 इज्याशीलो यायजूको

75 यज्वा स्यादासुतीबलः ।

76 सोमपः सोमपीथी स्या-

77 त्स्थपतिर्गीःपतीष्टिकृत् ॥ ८१८ ॥

78 सर्ववेदास्तु सर्वस्वदक्षिणं यज्ञमिष्टवान् ।

79 यजुर्विदध्वर्यु-

80 ऋग्विद्धोतो-

81 द्गाता तु सामविद् ॥ ८१९ ॥

82 यज्ञो यागः सवः सत्त्रं स्तोमो मन्युर्मखः क्रतुः ।

69. Des Büssers Wassertopf (2 W.). — 70. Ein Brahmane, der den Veda liest (2 W.). — 71. 72. Der Veranstalter eines Opfers (5 W.). — 73. Veranstalter eines Soma-Opfers (2 W.). — 74. Der, der häufig opfern lässt (2 W.). — 75. Einer, der beim Voll- und Neumonde u. s. w. opfern lässt (2 W.). — 76. Veranstalter eines Opfers, bei dem Soma getrunken wird (2 W.). — 77. Der Veranstalter eines Bṛhaspati-Opfers. — 78. Derjenige, welcher ein Opfer veranstaltet, bei dem er sein ganzes Vermögen den Priestern verschenkt. — 79. Ein mit dem Jag'ur-Veda vertrauter Brahmane (2 W.). — 80. Ein mit dem Ṛg-Veda vertrauter Br. (2 W.). — 81. Ein mit dem Sâma-Veda vertrauter Br. (2 W.). — 82. 83. Opfer (13 W.).

83 संस्तरः सप्ततन्तुश्च वितानं बर्हिरध्वरः ॥ ८२० ॥
84 अध्ययनं ब्रह्मयज्ञः
85 स्याद्देवयज्ञ आहुतिः ।
86 होमो होत्रं वषट्कारः
87 पितृयज्ञस्तु तर्पणम् ॥ ८२१ ॥
88 तच्छ्राद्धं पिण्डदानं च
89 नृयज्ञोऽतिथिपूजनम् ।
90 भूतयज्ञो बलिः
91 पञ्च महायज्ञा भवन्त्यमी ॥ ८२२ ॥
92 पौर्णमासश्च दर्शश्च यज्ञौ पक्षान्तयोः पृथक् ।
93 सौमिकी दीक्षणीयेष्टि-
94 दीक्षा तु व्रतसंग्रहः ॥ ८२३ ॥
95 वृतिः सुगहना कुम्बा
96 वेदी भूमिः परिष्कृता ।
97 स्थण्डिलं चत्वरं चान्या

84. Das Studium des Veda, das dem Brahma darzubringende Opfer (2 W.). — 85. 86. Brandopfer, das den Göttern darzubringende Opfer (5 W.). — 87. 88. Das den Manen darzubringende Todtenopfer (4 W.). — 89. Gastfreundschaft, das den Menschen darzubringende Opfer (2 W.). — 90. Ein allen Wesen dargebrachtes Opfer (2 W.). — 91. Dieses sind die fünf grossen Opfer. — 92. 1) Opfer am Tage des Vollmonds, 2) Opfer am Tage des Neumonds. — 93. Einweihendes Opfer. — 94. Einweihung (2 W.). — 95. Dichte Einfassung eines Opferplatzes. — 96. Der geweihte Opferplatz. — 97. Ein zu einem besondern Opfer geweihter Platz (2 W.).

98 यूपः स्याद्यज्ञकीलकः ॥ ८२४ ॥
99 चषालो यूपकटको
1 यूपकर्णो घृतावनौ ।
2 यूपाग्रभागे स्यात्तर्मा-
3 रणिर्निर्मन्थदारुणि ॥ ८२५ ॥
4 स्युर्दक्षिणाह्वनीयगार्हपत्यास्त्रयो ऽग्नयः ।
5 इदमग्नित्रयं त्रेता
6 प्रणीतः संस्कृतो ऽनलः ॥ ८२६ ॥
7 ऋक्सामिधेनी धाय्या च समिदाधीयते यया ।
8 समिदिन्धनमेधेध्मतर्पणैधांसि
9 भस्म तु ॥ ८२७ ॥
10 स्याद्भूतिर्भसितं रक्षा क्षारः
11 पात्रं स्रुवादिकम् ।
12 स्रुवः स्रु-
13 गधरा सोपभृ-

98. Pfosten, an den das Opferthier gebunden wird. — 99. Der hölzerne Ring an der Spitze eines solchen Pfostens. — 1. Der mit geklärter Butter besprengte Theil eines solchen Pfostens. — 2. Die Spitze eines solchen Pfostens. — 3. Holz, womit durch Reibung Feuer hervorgebracht wird. — 4. Die drei Opferfeuer. — 5. Dieselben zusammengenommen. — 6. Ein den Vorschriften gemäss zubereitetes Feuer. — 7. Strophe aus dem Ṛg-Veda, welche beim Auflegen der Feuerung ausgesprochen wird (2 W.). — 8. Feuerung (6 W.). — 9. 10. Asche (5 W.). — 11. Opfergefäss, wie Löffel u. s. w. — 12. Löffel (2 W.). — 13. Unterschale.

14 ज्जुहूः पुनरुत्तरा ॥ ८२८ ॥

15 ध्रुवा तु सार्वसंज्ञार्थं यस्यामाज्यं निधीयते ।

16 यो ऽभिगृह्य निहन्येत स स्यात्पशुरुपाकृतः ॥ ८२९ ॥

17 परंपराकं शसनं प्रोक्षणं च मखे वधः ।

18 हिंसार्थं कर्माभिचारः

19 स्याद्यज्ञार्हे तु यज्ञियम् ॥ ८३० ॥

20 हविः सांनाय्य-

21 मामिक्षा शृतोष्णक्षीरगं दधि ।

22 क्षीरसारः पयस्या च

23 तन्मस्तुनि तु वाजिनम् ॥ ८३१ ॥

24 हव्यं सुरेभ्यो दातव्यं

25 पितृभ्यः कव्यमोदनम् ।

26 आज्ये तु दधिसंयुक्ते पृषदाज्यं पृषातकः ॥ ८३२ ॥

27 दध्ना तु मधु संयुक्तं मधुपर्कं महोदयः ।

28 हवित्री तु होमकुण्डं

14. Oberschale. — 15. Schale, in welche die für das Sarvasaṅg'na-Opfer (?) bestimmte Butter gegossen wird. — 16. Ein unter den vorgeschriebenen Gebeten geschlachtetes Opfer. — 17. Schlachten eines Opferthiers (3 W.). — 18. Die dabei zu beobachtenden Ceremonien. — 19. Zum Opfer passend. — 20. Die zum Brandopfer bestimmte Substanz (2 W.). — 21. 22. Geronnene Milch, mit gekochter warmer Milch gemischt (3 W.). — 23. Der Schaum darauf. — 24. Die den Göttern darzubringende Speise. — 25. Die den Manen darzubringende Speise. — 26. Mit geronnener Milch gemischte Butter (2 W.). — 27. Mit geronnener Milch gemischter Honig (2 W.). — 28. Höhlung im Boden zu einem Brandopfer.

29 हव्यपाकः पुनश्चरुः ॥ ८३३ ॥
30 अमृतं यज्ञशेषे स्या-
31 द्विघसो भुक्तशेषके ।
32 यज्ञान्तो ऽवभृथः
33 पूर्तं वाप्यादी-
34 ष्टं मखक्रिया ॥ ८३४ ॥
35 इष्टापूर्तं तदुभयं
36 बर्हिर्मुष्टिस्तु विष्टरः ।
37 अग्निहोत्र्यग्निचिद्याहिताग्ना-
38 वथाग्निरक्षणाम् ॥ ८३५ ॥
39 अग्न्याधानमग्निहोत्रं
40 दर्वी तु घृतलेखनी ।
41 होमाग्निस्तु महाज्वालो महावीरः प्रवर्गवत् ॥ ८३६ ॥
42 होमधूमस्तु निगणो
43 होमभस्म तु वैष्टुतम् ।
44 उपस्पर्शस्त्वाचमनं
45 घारसेकौ तु सेचने ॥ ८३७ ॥

29. Gekochte, zum Brandopfer bestimmte Speise (2 W.). — **30.** Ueberbleibsel eines Opfers (2 W.). — **31.** Ueberbl. von Speisen (2 W.). — **32.** Beschluss eines Opfers (2 W.). — **33.** Fromme Werke, wie das Graben eines Teiches u. s. w. — **34.** Darbringung von Opfern. — **35.** Beides verbunden. — **36.** Handvoll heiligen Grases. — **37.** Der das heilige Feuer unterhält (3 W.). — **38. 39.** Pflege des Opferfeuers (3 W.). — **40.** Löffel zum Rühren der Butter. — **41.** Das zum Brandopfer bestimmte Feuer (4 W.). — **42.** Rauch des Brandopfers. — **43.** Asche des Brandopfers. — **44.** Spülen des Mundes (2 W.). — **45.** Besprengen des Feuers mit Butter

46 ब्रह्मासनं ध्यानयोगासने
47 ऽथ ब्रह्मवर्चसम् ।
48 वृत्ताध्ययनर्द्धिः
49 पाठे स्याद्ब्रह्माञ्जलिरञ्जलिः ॥ ८३८ ॥
50 पाठे तु मुखनिष्क्रान्ता विप्रुषो ब्रह्मबिन्दवः ।
51 साकल्यवचनं पारायणं
52 कल्पे विधिक्रमौ ॥ ८३९ ॥
53 मूले ऽङ्गुष्ठस्य स्याद्ब्राह्मं तीर्थं
54 कायं कनिष्ठयोः ।
55 पित्र्यं तर्जन्यङ्गुष्ठान्त-
56 र्दैवतं त्वङ्गुलीमुखे ॥ ८४० ॥
57 ब्रह्मत्वं तु ब्रह्मभूयं ब्रह्मसायुज्यमित्यपि ।
58 देवभूयादिकं तद्व-
59 दथोपाकरणं श्रुतेः ॥ ८४१ ॥
60 संस्कारपूर्वं ग्रहणं स्या-

u. s. w. (3 W.). — 46. Das Sitzen in Betrachtung und Andacht. — 47. 48. Vollkommenheit im Lebenswandel und im Studium der heiligen Schrift. — 49. Zusammenlegen der Hände beim Lesen des Veda. — 50. Speicheltropfen, welche beim Lesen des Veda aus dem Munde fallen. — 51. Vollständiges Durchlesen. — 52. Ritus (3 W.). — 53. Die Wurzel des Daumens. — 54. Wurzel der beiden kleinen Finger. — 55. Raum zwischen dem Daumen und dem Zeigefinger. — 56. Die Spitze der Finger. — 57. Vereinigung mit Brahma (3 W.). — 58. Vereinigung mit den Göttern u. s. w. (3 W.). — 59. 60. Den Unterricht im Veda nach gehöriger Vorbereitung empfangen.

61 त्स्वाध्यायः पुनर्जपः ।
62 औपवस्त्रं तूपवासः
63 कृच्छ्रं सांतपनादिकम् ॥ ८४२ ॥
64 प्रायः संन्यास्यनशने
65 नियमः पुण्यकं व्रतम् ।
66 चरित्रं चरिताचारौ चारित्रचरणे अपि ॥ ८४३ ॥
67 वृत्तं शीलं च
68 सर्वैनोध्वंसिजप्ये ऽघमर्षणम् ।
69 समास्तु पादग्रहणाभिवादनोपसंग्रहाः ॥ ८४४ ॥
70 उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ।
71 प्राचीनावीतमन्यस्मि-
72 न्निवीतं कण्ठलम्बितम् ॥ ८४५ ॥
73 प्राचेतसस्तु वाल्मीकिर्वल्मीककुशिनौ कविः ।
74 मैत्रावरुणवाल्मीकौ
75 वेदव्यासस्तु माठरः ॥ ८४६ ॥
76 द्वैपायनः पाराशर्यः कानीनो वादरायणः ।
77 व्यासो

61. Den **Veda** für sich mit leiser Stimme lesen (2 W.). — **62.** Fasten (2 W.). — **63.** Strenges Fasten, wie das **Sâṁtapana** u. s. w. — **64.** Völliges Sich-Enthalten des Essens, freiwilliger Hungertod. — **65.** Gelübde, Observanz (3 W.). — **66. 67.** Lebenswandel (7 W.). — **68.** Von allen Sünden befreiendes Gebet — **69.** Begrüssung des Lehrers, wobei man dessen Füsse berührt (3 W.). — **70.** Die heilige Schnur unter den rechten Arm gezogen. — **71.** Dieselbe unter den linken Arm gezogen. — **72.** Dieselbe um den Hals hängend. — **73. 74. Vâlmîki** (7 W.). — **75—77. Vyâsa** (7 W.).

78 ऽस्याम्बा सत्यवती वासवी गन्धकालिका ॥ ८४७ ॥
79 योजनगन्धा दाशेयी शालङ्कायनजा च सा ।
80 जामदग्न्यस्तु रामः स्याद्भार्गवो रेणुकासुतः ॥ ८४८ ॥
81 नारदस्तु देवब्रह्मा पिशुनः कलिकारकः ।
82 वसिष्ठो ऽरुन्धतीजानि-
83 रक्षमाला त्वरुन्धती ॥ ८४९ ॥
84 त्रिशङ्कुयाजी गाधेयो विश्वामित्रश्च कौशिकः ।
85 कुशारणिस्तु दुर्वासाः
86 शतानन्दस्तु गौतमः ॥ ८५० ॥
87 याज्ञवल्क्यो ब्रह्मरात्रिर्योगेशो ऽ
88 प्यथ पाणिनौ ।
89 सालातुरीयदाक्षेयौ
90 गोनर्दीये पतञ्जलिः ॥ ८५१ ॥
91 कात्यायनो वररुचिर्मेधाजिच्च पुनर्वसुः ।
92 अथ व्याडिर्विन्ध्यवासी नन्दिनीतनयश्च सः ॥ ८५२ ॥
93 स्फोटायने तु कक्षीवा-
94 न्पालकाप्ये करेणुभूः ।
95 वात्स्यायने मल्लनागः कौटल्यश्चणकात्मजः ॥ ८५३ ॥

78. 79. Vyâsa's Mutter (6 W.). — 80. Paraçurâma (4 W.). — 81. Nârada (4 W.). — 82. Vasishtha (2 W.). — 83. Vasishtha's Gattin (2 W.) — 84. Viçvâmitra (4 W.). — 85. Durvâsas (2 W.). — 86. Gautama (2 W.). — 87. Jâgńavalkya (3 W.). — 88. 89. Pâṇini (3 W.). — 90. Patan'gali (2 W.). — 91. Kâtjâjana (4 W.). — 92. Vjâḍi (3 W.). — 93. Sphoṭâjana (2 W.). — 94. Pâlakâpja (2 W.). — 95. 96. K'âṇakja (8 W.).

96 द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः ।
97 क्षतव्रतोऽवकीर्णी स्या-
98 द्व्रात्यः संस्कारवर्जितः ॥ ८५४ ॥
99 शिग्धिदानः कृष्णकर्मा
1 ब्रह्मबन्धुर्द्विजोऽधमः ।
2 नष्टाग्निर्वीरहा
3 जातिमात्रजीवी द्विजब्रुवः ॥ ८५५ ॥
4 धर्मध्वजी लिङ्गवृत्ति-
5 र्वेदहीनो निराकृतिः ।
6 वार्त्ताशी भोजनार्थं यो गोत्रादि वदति स्वकम् ॥ ८५६ ॥
7 उच्छिष्टभोजनो देवनैवेद्यबलिभोजनः ।
8 अजपस्त्वसदध्येता
9 शाखारण्डोऽन्यशाखकः ॥ ८५७ ॥

97. Ein **ṛshi**, der das Gelübde der Keuschheit gebrochen hat. — 98. Derjenige, bei dem die Weihe nicht vollzogen worden ist. — 99. Bösewicht. — 1. Ein verächtlicher Brahmane. — 2. Ein Brahmane, der das geweihte Feuer hat ausgehen lassen. — 3. Einer, der nur durch die Geburt, nicht aber durch Studien u. s. w. Ansprüche auf den Namen eines Brahmanen hat. — 4. Ein heuchelnder Brahmane (2 W.). — 5. Ein Brahmane, der mit den **Veden** unbekannt ist (2 W.). — 6. Ein Brahmane, der, um sich Speise zu verschaffen, von seiner Herkunft u. s. w. spricht. — 7. Ein Brahmane, der von den Ueberbleibseln der Opfer, welche den seiner Sorge anvertrauten Götzenbildern dargebracht werden, lebt. — 8. Ein Brahmane, der ketzerische Werke liest (2 W.). — 9. Ein Brahmane, der seiner Schule untreu geworden ist (2 W.).

10 शस्त्राजीवः काण्डस्पृष्टो
11 गुरुहा नरकीलकः ।
12 मत्तो देवादिपूजायामश्रद्धो
13 ऽथ मलिम्लुचः ॥ ८५८ ॥
14 पञ्चयज्ञपरिभ्रष्टो
15 निषिद्धैकरुचिः खलः ।
16 सुप्ते यस्मिन्नुदेत्यर्को ऽस्तमेति च क्रमेण तौ ॥ ८५९ ॥
17 अभ्युदिताभिनिर्मुक्तौ
18 वीरोज्झो न जुहोति यः ।
19 अग्निहोत्रच्छलाद्याच्ञापरो वीरोपजीवकः ॥ ८६० ॥
20 वीरविप्रावको जुह्वन्धनैः शूद्रसमाहृतैः ।
21 स्याद्वादवाद्यार्हतः स्या-
22 च्छून्यवादी तु सौगतः ॥ ८६१ ॥
23 नैयायिकस्त्वाक्षपादो यौगः

10. Ein Brahmane, der von den Waffen lebt (2 W.). — **11**. Der Mörder seines Guru (2 W.). — **12**. Derjenige, der keinen Glauben in die Verehrung der Götter u. s. w. setzt. — **13**. **14**. Ein Brahmane, der die 5 grossen Opfer unterlässt. — **15** Derjenige, welcher nur nach verbotenen Dingen ein Verlangen hat. — **16**. **17**. **1**) Derjenige, der bei Sonnenaufgang noch schläft. 2) Derjenige, der bei Sonnenuntergang schon schläft. — **18**. Ein Brahmane, der das Opfern unterlässt. — **19**. Ein Brahmane, der unter dem Vorgeben, dass er für das geweihte Feuer Sorge trage, um Almosen bittet. — **20**. Ein Brahmane, der ein Opfer mit von Çûdra's zusammengebrachtem Gelde vollbringt. — **21**. Ein Bekenner des Skepticismus, ein G'aina (2 W.). — **22**. Ein Bekenner der Lehre vom Nichts, ein Buddhaist (2 W.). — **23**. Ein Anhänger der Njâja-Lehre (3 W.).

24 सांख्यस्तु कापिलः ।
25 वैशेषिकः स्यादौलूक्यो
26 बार्हस्पत्यस्तु नास्तिकः ॥ ८६२ ॥
27 चार्वाको लौकायतिकश्चै-
28 ते षडपि तार्किकाः ।
29 क्षत्त्रं तु क्षत्त्रियो राजा राजन्यो बाहुसंभवः ॥ ८६३ ॥
30 आर्या भूमिस्पृशो वैश्या ऊरव्या ऊरुजा विशः ।
31 वाणिज्यं पाशुपाल्यं च कर्षणं चेति वृत्तयः ॥ ८६४ ॥
32 आजीवो जीवनं वार्त्ता जीविका वृत्तिवेतने ।
33 उञ्छो धान्यकणादानं
34 कणिशाद्यर्जनं शिलम् ॥ ८६५ ॥
35 ऋतं तद्द्वय-
36 मनृतं कृषि-
37 र्मृतं तु याचितम् ।
38 अयाचितं स्यादमृतं

24. Ein Anhänger der Lehre des **Kapila** (2 W.). — 25. Ein Anhänger der **Vaiçeshika**-Lehre (2 W.). — 26. 27. Materialist (4 W.). — 28. Alle 6 heissen mit einem gemeinschaftlichen Namen **târkika's**, d. i. Anhänger einer philosophischen Schule. — 29. **Kshattrija** (5 W.). — 30. **Vaiçja's** (6 W.). — 31. Handel, Viehzucht und Ackerbau sind die Mittel zum Lebensunterhalt. — 32. Lebensunterhalt (6 W.). — 33. Das Getreide körnerweise einsammeln. — 34. Aehrenlese u. s. w. — 35. Der gemeinschaftliche Name für beide Geschäfte. — 36. Ackerbau (2 W.). — 37. Erbettelte Almosen (2 W.). — 38. Almosen, die von freien Stücken gegeben werden (2 W.).

39 सेवावृत्तिः श्वजीविका ॥ ८६६ ॥
40 सत्यानृतं तु वाणिज्यं बणिज्या
41 बाणिजो बणिग् ।
42 क्रयविक्रयिकपण्याजीवापणिकनैगमाः ॥ ८६७ ॥
43 वैदेहकः सार्थवाहश्च
44 क्रायकः क्रयिकः क्रयी ।
45 क्रेपदे तु विपूर्वास्ते
46 मूल्ये वस्नार्थवक्रयाः ॥ ८६८ ॥
47 मूलद्रव्यं परिपणो नीवी
48 लाभो ऽधिकं फलम् ।
49 परिदानं विनिमयो नैमेयः परिवर्तनम् ॥ ८६९ ॥
50 व्यतिहारः परावर्तो वैमेयो विमयो ऽपि च ।
51 निक्षेपोपनिधी न्यासे
52 प्रतिदानं तदर्पणम् ॥ ८७० ॥
53 क्रेतव्यमात्रके क्रेयं
54 क्रय्यं न्यस्तं क्रयाय यद् ।
55 पणितव्यं तु विक्रेयं पण्यं
56 सत्यापनं पुनः ॥ ८७१ ॥

39. Der Unterhalt durch Dienst. — 40. Handel (3 W.). — 41—43. Handelsmann (8 W.). — 44. Käufer (3 W.). — 45. Verkäufer (4 W.). — 46. Preis (4 W.). — 47. Kapital (2 W.). — 48. Gewinn (2 W.). — 49. 50. Tausch (8 W.). — 51. Pfand, ein anvertrautes Gut (3 W.). — 52. Wiederablieferung desselben. — 53. Käuflich. — 54. Zum Verkauf ausgestellt. — 55. Verkäuflich (3 W.). — 56. 57. Den Handel abschliessen (3 W.).

57 सत्यंकारः सत्याकृति-

58 स्तुल्यौ विपणाविक्रयौ ।

59 गण्यं गणेयं संख्येयं

60 संख्या त्वेकादिका भवेत् ॥ ८७२ ॥

61 यथोत्तरं दशगुणं भवेदेको दशामुतः ।

62 शतं सहस्रमयुतं लक्षप्रयुतकोटयः ॥ ८७३ ॥

63 अर्बुदमब्जं खर्वं च निखर्वं च महाम्बुजम् ।

64 शङ्कुर्वार्धिरन्त्यं मध्यं परार्धं चेति नामतः ॥ ८७४ ॥

65 असंख्यं द्वीपवार्ध्यादि

66 पुद्गलात्माद्यनन्तकम् ।

67 सांयात्रिकः पोतवणि-

68 ग्यानपात्रं वहित्रकम् ॥ ८७५ ॥

69 बोहित्थं वहनं पोतः

70 पोतवाहो नियामकः ।

71 निर्यामः

72 कर्णधारस्तु नाविको

73 नौस्तु मङ्गिनी ॥ ८७६ ॥

74 तरीतरण्यौ वेडा-

78. Holz (3 W.). — 79. Baumhöhle (2 W.). — 80. Zusammengesetzter Blumenstängel (3 W.). — 81. Blatt (7 W.). — 82. Junges Blatt (3 W.). — 83. 84. Noch nicht entwickeltes Blatt. — 85. Blattauge (2 W.). — 86. Ader eines Blattes. — 87. Ein Ast mit seinen jungen Schüssen (2 W.). — 88. 89. Blume (8 W.). — 90. Eine Menge junger Knospen (2 W.). — 91. Knospe (2 W.). — 92. Eine sich öffnende Knospe (2 W.). — 93. 94. Blumenbüschel (5 W.). — 95. Blumenstaub.

96 ऽथ रसो मधु ॥ ११२६ ॥

97 मकरन्दो मरन्दश्च

98 वृत्तं प्रसवबन्धनम् ।

99 प्रबुद्धोज्जृम्भफुल्लानि व्याकोषं विकचं स्मितम् ॥ ११२७ ॥

1 उन्मिषितं विकसितं दलितं स्फुटितं स्फुटम् ।

2 प्रफुल्लोत्फुल्लसंफुल्लोच्छ्वसितानि विजृम्भितम् ॥ ११२८ ॥

3 स्मेरं विनिद्रमुन्निद्रविमुद्रहसितानि च ।

4 संकुचितं तु निद्राणं मीलितं मुद्रितं च तद् ॥ ११२९ ॥

5 फलं तु सस्यं

6 तच्छुष्कं वान-

7 मामं शलाटु च ।

8 ग्रन्थिः पर्व परु-

9 र्बीजकोषी शिम्बा शमी शिमिः ॥ ११३० ॥

10 शिम्बिश्च

11 पिप्पलोऽश्वत्थः श्रीवृक्षः कुञ्जराशनः ।

12 कृष्णावासो बोधितरुः

13 प्लक्षस्तु पर्कटी जटी ॥ ११३१ ॥

14 न्यग्रोधस्तु बहुपाद्वटो वैश्रवणालयः ।

15 उडुम्बरो जन्तुफलो मशकी हेमदुग्धकः ॥ ११३२ ॥

96. 97. Blumensaft (3 W.). — 98. Blumen- oder Fruchtstiel. — 99—3. Aufgeblüht (21 W.). — 4. Noch nicht aufgeblüht (4 W.). — 5. Frucht (2 W.). — 6. Getrocknet (Frucht). — 7. Unreif. — 8. Gelenk (3 W.). — 9. 10. Hülsenfrucht, Hülse (5 W.). — 11. 12. *Ficus religiosa* (6 W.). — 13. *Ficus venosa* (3 W.). — 14. *Ficus indica* (4 W.). — 15. *Ficus glomerata* (4 W.).

16 काकोडुम्बरिका फल्गुर्मलयूर्जघनेफला ।

17 आम्रश्चूतः सहकारः

18 सप्तपर्णस्त्वयुक्छदः ॥ ११३३ ॥

19 शिग्रुः शोभाञ्जनो ऽक्षीवतीक्ष्णगन्धकमोचकाः ।

20 श्वेते ऽत्र श्वेतमरिचः

21 पुंनागः सुरपर्णिका ॥ ११३४ ॥

22 वकुलः केशरो

23 ऽशोकः कङ्केल्लिः

24 ककुभो ऽर्जुनः ।

25 मालूरः श्रीफलो विल्वः

26 किंकिरातः कुरण्टकः ॥ ११३५ ॥

27 त्रिपत्रकः पलाशः स्यात्किंशुको ब्रह्मपादपः ।

28 तृणराजस्तालस्तालो

29 रम्भा मोचा कदल्यपि ॥ ११३६ ॥

30 करवीरो हयमारः

31 कुटजो गिरिमल्लिका ।

32 विडुलो वेतसः सीतो वानीरो वञ्जुलो रथः ॥ ११३७ ॥

16. *Ficus oppositifolia* (4 W.). — 17. *Mangifera indica* (3 W.). — 18. *Echites scholaris* (2 W.). — 19. *Hyperanthera morunga* (5 W.). — 20. *Hyperanthera* mit weissen Früchten. — 21. *Rottleria tinctoria* (2 W.). — 22. *Mimusops elengi* (2 W.). — 23. *Jonesia asoca* (2 W.). — 24. *Pentaptera arjuna* (2 W.). — 25. *Aegle marmelos* (3 W.). — 26. *Barleria prionitis* (2 W.). — 27. *Butea frondosa* (4 W.). — 28. *Borassus flabelliformis* (3 W.). — 29. *Musa sapientum* (3 W.). — 30. *Nerium odorum* (2 W.). — 31. *Echites antidysenterica* (2 W.). — 32. *Calamus rotang* (6 W.).

33 कर्कन्धुः कुवली कोलिर्बद-

34 र्यथ हलिप्रियः ।

35 नीपः कदम्वः

36 सालस्तु सर्जो

37 ऽरिष्टस्तु फेनिलः ॥ ११३८ ॥

38 निम्बो ऽरिष्टः पिचुमन्दः

39 समौ पिचुलझाबुकौ ।

40 कर्पासस्तु वादरः स्यात्पिचव्य-

41 स्तूलकं पिचुः ॥ ११३९ ॥

42 आरग्वधः कृतमाले

43 वृषो वासाटरूषके ।

44 करञ्जस्तु नक्तमालः

45 स्नुहिर्वज्री महातरुः ॥ ११४० ॥

46 महाकालस्तु किंपाके

47 मन्दारः पारिभद्रके ।

48 मधूकस्तु मधुष्ठीलो गुडपुष्पो मधुद्रुमः ॥ ११४१ ॥

49 पीलुः सिनो गुडफलो

33. *Zizyphus jujuba* (4 W.). — 34. 35. *Nauclea kadamba* (3 W.). — 36. *Shorea robusta* (2 W.). — 37. *Sapindus saponaria* (2 W.). — 38. *Melia azadaracta* (3 W.). — 39. *Tamarix indica* (2 W.). — 40. Baumwollenstaude (3 W.). — 41. Baumwolle (2 W.). — 42. *Cassia fistula* (2 W.). — 43. *Justicia adhatoda* (3 W.). — 44. *Galedupa arborea* (2 W.). — 45. *Euphorbia antiquorum* (3 W.). — 46. *Trichosanthes palmata, Cucumis colocynthus* (2 W.). — 47. *Erythrina fulgens* (2 W.). — 48. *Bassia latifolia* (4 W.). — 49. *Careya arborea, Salvadora persica* (3 W.).

50 गुग्गुलस्तु पलंकषः ।

51 राजादनः प्रियालः स्या-

52 त्तिनिशस्तु रथद्रुमः ॥ ११४२ ॥

53 नागरङ्गस्तु नारङ्ग

54 इङ्गुदी तापसद्रुमः ।

55 काश्मीरी भद्रपर्णी श्रीप-

56 र्ण्यम्लिका तु तिन्तिडी ॥ ११४३ ॥

57 शेलुः श्लेष्मातकः

58 पीतसालस्तु प्रियको ऽसनः ।

59 पाटलिः पाटला

60 भूर्जो बहुत्वक्को मृदुच्छदः ॥ ११४४ ॥

61 द्रुमोत्पलः कर्णिकारे

62 निचुले हिज्जलेज्जलौ ।

63 धात्री शिवा चामलकी

64 कलिद्रुमो बिभीतकः ॥ ११४५ ॥

65 हरीतक्यभया पथ्या

50. *Amyris agallochum* (2 W.). — 51. *Buchanania latifolia* (2 W.). — 52. *Dalbergia ougeiniensis* (2 W). — 53. *Citrus aurantium* (2 W.). — 54. *Nagelia putrangiva* (2 W.). — 55. *Gmelina arborea* (3 W.). — 56. *Tamarindus indica* (2 W.). — 57. *Cordia myxa* (2 W.). — 58. *Pentaptera tomentosa* (3 W.). — 59. *Bignonia suaveolens* (2 W.). — 60. Birkenart (3 W.). — 61. *Pterospermum acerifolium* (2 W.). — 62. *Barringtonia acutangula* (3 W.). — 63. *Phyllanthus emblica* (3 W.). — 64. *Terminalia belerica* (3 W.). — 65. *Terminalia citrina* (3 W.).

66 त्रिफला तत्फलत्रयम् ।

67 तापिञ्छस्तु तमालः स्या-

68 च्चम्पको हेमपुष्पकः ॥ १४६ ॥

69 निर्गुण्डी सिन्दुवारे

70 ऽतिमुक्तके माधवी लता ।

71 वासन्ती चो-

72 ड्रपुष्पं तु जपा

73 जातिस्तु मालती ॥ १४७ ॥

74 मल्लिका स्याद्विचकिलः

75 सप्तला नवमालिका ।

76 मागधी यूथिका

77 सा तु पीता स्याद्धेमपुष्पिका ॥ १४८ ॥

78 प्रियङ्गुः फलिनी श्यामा

79 बन्धूको बन्धुजीवकः ।

80 करुणो मल्लिकापुष्पो

81 जम्बीरे जम्भजम्भलौ ॥ १४९ ॥

82 मातुलुङ्गो बीजपूरः

66. Der gemeinschaftliche Name für die Frucht der drei vorhergehenden. — **67.** *Xanthocymus pictorius* (2 W.). — **68.** *Michelia champaka* (2 W.). — **69.** *Vitex negundo* (2 W.). — **70. 71.** *Gaertnera racemosa* (4 W.). — **72.** *Hibiscus rosa sinensis* (2 W.). — **73.** *Jasminum grandiflorum* (2 W.). — **74.** *Jasminum zambac* (2 W.). — **75.** *Jasminum zambac floribus multiplicatis* (2 W.). — **76.** *Jasminum auriculatum* (2 W.). — **77.** Gelber Jasmin. — **78.** Prijan̆gu (3 W.). — **79.** *Pentapetes phoenicea* (2 W.). — **80.** *Citrus decumana* (2 W.). — **81.** *Citrus acida* (3 W.). — **82.** *Citrus medica* (2 W.).

83 करीरक्रकरौ समौ ।

84 पञ्चाङ्गुलः स्यादेरण्डे

85 धातक्यां धातुपुष्पिका ॥ ११५० ॥

86 कपिकच्छूरात्मगुप्ता

87 धत्तूरः कनकाह्वयः ।

88 कपित्थस्तु दधिफलो

89 नालिकेरस्तु लाङ्गली ॥ ११५१ ॥

90 आम्रातको वर्षपाकी

91 केतकः क्रकचच्छदः ।

92 कोविदारो युगपत्रः

93 सल्लकी तु गजप्रिया ॥ ११५२ ॥

94 वंशो वेणुर्यवफलस्त्वचिसारस्तृणध्वजः ।

95 मस्करः शतपर्वा च

96 स्वनन्वातात्स कीचकः ॥ ११५३ ॥

97 तुकाक्षीरी वंशक्षीरी त्वक्क्षीरी वंशरोचना ।

98 पूगे क्रमुकगूवाकौ

99 तस्योद्वेगं पुनः फलम् ॥ ११५४ ॥

83. *Capparis aphylla* (2 W.). — 84. *Palma Christi* (2 W.). — 85. *Grislea tomentosa* (2 W.). — 86. *Dolichos pruriens* (2 W.). — 87. *Datura fastuosa* (2 W.). — 88. *Feronia elephantum* (2 W.). — 89. *Cocos nucifera* (2 W.). — 90. *Spondias mangifera* (2 W.). — 91. *Pandanus odoratissimus* (2 W.). — 92. *Bauhinia variegata* (2 W.). — 93. *Boswellia thurifera* (2 W.). — 94. 95. *Bambus* (7 W.). — 96. Bambusrohr, welches im Winde pfeift. — 97. Manna vom Bambus (4 W.). — 98. *Areca faufel* oder *catechu* (3 W.). — 99. Betelnuss.

1 ताम्बूलवल्ली ताम्बूली नागपर्यायवल्ल्यपि ।
2 तुम्ब्यलाबूः
3 कृष्णला तु गुञ्जा
4 द्राक्षा तु गोस्तनी ॥ ११५५ ॥
5 मृद्वीका हारहूरा च
6 गोक्षुरस्तु त्रिकण्टकः ।
7 श्वदंष्ट्रा स्थलशृङ्गाटो
8 गिरिकार्ण्यपराजिता ॥ ११५६ ॥
9 व्याघ्री निर्दिग्धिका कण्टकारिका स्या-
10 दथामृता ।
11 वत्सादनी गुडूची च
12 विशाला त्विन्द्रवारुणी ॥ ११५७ ॥
13 उशीरं वीरणीमूले
14 ह्रीवेरे वालकं जलम् ।
15 प्रपुनाटस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ॥ ११५८ ॥
16 लट्वायां महारजनं कुसुम्भं कमलोत्तरम् ।
17 लोध्रे तु गालवो रोध्रतिल्वशावरमार्जनाः ॥ ११५९ ॥

1. *Piper betel* (3 W.). — 2. *Cucurbita lagenaris* (2 W.). — 3. *Abrus precatorius* (2 W.). — 4. 5. Weintraube (4 W.). — 6. 7. *Ruellia longifolia, Tribulus lanuginosus* (4 W.). — 8. *Clitoria ternatea* (2 W.). — 9. *Solanum Jacquini* (3 W.). — 10. 11. *Menispermum glabrum* (3 W.). — 12. *Cucumis colocynthis* (2 W.). — 13. Wurzel von *Andropogon muricatum* (2 W.). — 14. *Andropogon schaenanthus?* (3 W.). — 15. *Cassia tora* (4 W.). — 16. *Carthamus tinctorius* (4 W.). — 17. *Symplocus racemosa* (6 W.).

18 मृणालिनी पुटकिनी नलिनी पङ्कजिन्यपि ।
19 कमलं नलिनं पद्ममरविन्दं कुशेशयम् ॥ ११६० ॥
20 परं शतसहस्राभ्यां पत्त्रं राजीवपुष्करे ।
21 विसप्रसूनं नालीकं तामरसं महोत्पलम् ॥ ११६१ ॥
22 तज्जलात्सरसः पङ्कात्परे रुड्रुहजन्मतः ।
23 पुण्डरीकं सिताम्भोज-
24 मथ रक्तसरोरुहे ॥ ११६२ ॥
25 रक्तोत्पलं कोकनदं
26 कैरविण्यां कुमुद्वती ।
27 उत्पलं स्यात्कुवलयं कुवेलं कुवलं कुवम् ॥ ११६३ ॥
28 श्वेते तु तत्र कुमुदं कैरवं गर्दभाह्वयम् ।
29 नीले तु स्यादिन्दीवरं
30 हल्लकं रक्तसंध्यके ॥ ११६४ ॥
31 सौगन्धिकं तु कह्लारं
32 बीजकोषो वराटकः ।
33 कर्णिका
34 पद्मनालं तु मृणालं तन्तुलं विसम् ॥ ११६५ ॥

18. Gruppe von *Nelumbium spectosum* (4 W.). — 19—22. *Nelumbium spectosum*, *Nymphaea nelumbo* (25 W.). — 23. Weisser Lotus (2 W.). — 24. 25. Rother Lotus (3 W.). — 26. Gruppe von *Nymphaea esculenta* (2 W.). — 27. Bei Nacht blühende *Nymphaea* (5 W.). — 28. *Nymphaea esculenta* (3 W.). — 29. *Nymphaea caerulea.* — 30. *Nymphaea rubra* (2 W.). — 31. *Nymphaea lotus* (2 W.). — 32. 33. Samengefäss beim Lotus (3 W.). — 34. Die Fasern am Losusstängel (4 W.).

35 किंजल्कं केशरं

36 संवर्तिका तु स्यान्नवं दलम् ।

37 करहाटः शिफा च स्यात्कन्दे सलिलजन्मनाम् ॥ ११६६ ॥

38 उत्पलानां तु शालूकं

39 नील्यां शैवालशेवले ।

40 शेवालं शैवलं शेपालं जलाच्छूकनीलिके ॥ ११६७ ॥

41 धान्यं तु सस्यं सीत्यं च व्रीहिः स्तम्बकरिश्च तत् ।

42 आशुः स्यात्पाटलो व्रीहि-

43 र्गर्भपाकी तु षष्टिकः ॥ ११६८ ॥

44 शालयः कलमाद्याः स्युः

45 कलमस्तु कलामकः ।

46 लोहितो रक्तशालिः स्या-

47 न्महाशालिः सुगन्धिकः ॥ ११६९ ॥

48 यवो हयप्रियस्तीक्ष्णशूक-

49 स्तोक्मस्त्वसौ हरित् ।

50 मङ्गल्यको मसूरः स्या-

35. Die Staubfäden einer Lotusblume (2 W.). — **36.** Das junge Blatt eines Lotus. — **37.** Die Wurzel eines Lotus (2 W.). — **38.** Die Wurzel der zur Nacht blühenden Nymphaeen. — **39. 40.** *Vallisneria octandra* (8 W.). — **41.** Getreide (im weitesten Sinne) (5 W.). — **42.** Reis, der in der Regenzeit reift (3 W.). — **43.** Reis, der in 60 Tagen reift (2 W.). — **44.** Reis, der unter Wasser wächst (45—47). — **45.** Reis, der im Mai — Juni gesäet und im December — Januar reif wird (2 W.). — **46.** Rother Reis, *Oriza sativa.* — **47.** Wohlriechender Reis (2 W.). — **48** Gerste (3 W.). — **49.** Grüne oder unreife Gerste. — **50.** *Cicer lens* (2 W.).

51 त्कलायस्तु सतीनकः ॥ ११७० ॥

52 हरेणुः खण्डिकश्चा-

53 थ चणको हरिमन्थकः ।

54 माषस्तु मदनो नन्दी वृष्यो बीजवरो बली ॥ ११७१ ॥

55 मुद्गस्तु प्रथनो लोभ्यो वलाटो हरितो हरिः ।

56 पीते ऽस्मिन्वसुखण्डीरप्रवेलजयशारदाः ॥ ११७२ ॥

57 कृष्णे प्रवरवासन्तहरिमन्थजशिम्बिकाः ।

58 वनमुद्गे तु वरकनिगूढककुलीनकाः ॥ ११७३ ॥

59 खण्डी च

60 राजमुद्गे तु मकुष्टकमयुष्टकौ ।

61 गोधूमे सुमनो

62 वल्ले निष्पावः सितशिम्बिकः ॥ ११७४ ॥

63 कुलत्थस्तु कालवृन्त-

64 स्ताम्रवृन्ता कुलत्थिका ।

65 आढकी तुवरी वर्णा स्या-

66 त्कुल्मासस्तु यावकः ॥ ११७५ ॥

67 नीवारस्तु वनव्रीहिः

51. 52. Erbsen (4 W.). — 53. *Cicer arietinum* (2 W.). — 54. *Phaseolus radiatus* (6 W.). — 55. *Phaseolus mungo* (6 W.). — 56. Gelbe Varietät desselben (5 W.). — 57. Schwarze Varietät (4 W.). — 58. 59. *Phaseolus trilobus* (4 W.). — 60. Andere Art *Phaseolus* (3 W.). — 61. Weizen (2 W.). — 62. Weizenart (?) (3 W.). — 63. *Dolichos biflorus* (2 W.). — 64. Varietät davon (2 W.). — 65. *Cytisus cajan* (3 W.). — 66. Halbreifer *Phaseolus radiatus* u. s. w. (2 W.). — 67. Wilder Reis.

68 श्यामाकश्यामको समौ ।

69 कङ्गुस्तु कङ्गुनी क्षङ्गुः प्रियङ्गुः पीततण्डुला ॥ ११७६ ॥

70 सा कृष्णा मधुका

71 रक्ता शोधिका

72 मुसटी सिता ।

73 पीता माध-

74 व्यथोद्दालः कोद्रवः कोरदूषकः ॥ ११७७ ॥

75 चीनकस्तु काककङ्गु-

76 र्यवनालस्तु योनलः ।

77 जूर्णाह्वयो देवधान्यं जोन्नाला बीजपुष्पिका ॥ ११७८ ॥

78 शणां भङ्गा मातुलानी स्या-

79 दुमा तु क्षुमातसी ।

80 गवेधुका गवेधुः स्या-

81 ज्जर्तिलो ऽरण्यजस्तिलः ॥ ११७९ ॥

82 षण्डतिले तिलपिञ्जस्तिलपेजो

83 ऽथ सर्षपः ।

84 कदम्बकस्तन्तुभो

68. *Panicum frumentaceum, P. colonum* (2 W.). — 69. *Panicum italicum* (5 W.). — 70. Schwarze Varietät davon. — 71. Rothe Varietät davon. — 72. Weisse Varietät davon. — 73. Gelbe Varietät davon. — 74. *Paspalum frumentaceum* (3 W.). — 75. *Panicum miliaceum* (2 W.). — 76. 77. *Andropogon* oder *Holcus bicolor* (6 W.). — 78. *Cannabis sativa* (3 W.). — 79. *Linum usitatissimum* (3 W.). — 80. *Coix barbata* (2 W.). — 81. Wilder Sesam. — 82. Unfruchtbarer Sesam (3 W.). — 83. 84. *Sinapis dichotoma* (3 W.).

85 ऽथ सिद्धार्थः श्वेतसर्षपः ॥ ११८० ॥
86 माषाद्यः शमीधान्यं
87 शूकधान्यं यवादयः ।
88 स्यात्सस्यशूकं किंशारुः
89 कणिशं सस्यशीर्षकम् ॥ ११८१ ॥
90 स्तम्बस्तु गुच्छो धान्यादे-
91 र्नालं काण्डो
92 ऽफलस्तु सः ।
93 पलः पलालो
94 धान्यत्वक्तुषो
95 बुसे कडंगरः ॥ ११८२ ॥
96 धान्यमावसितं रिद्धं
97 तत्पूतं निर्बुसीकृतम् ।
98 मूलपत्रकरीराग्रफलकाण्डा विरूढकाः ॥ ११८३ ॥
99 त्वक्पुष्पं कवकं शाकं दशधा शिग्रुकं च तद् ।

85. *Sinapis glauca.* — 86. Hülsenfrucht, wie **mâsha** (*Phaseolus radiatus*) u. s. w. — 87. Aehrenfrucht, wie Gerste u. s. w. — 88. Der Bart an d. Aehre (2 W.). — 89. Aehre. — 90. Garbe (2 W.). — 91. Halm mit der Frucht (2 W.). — 92. 93. Halm ohne die Frucht (2 W.). — 94. Hülse. — 95. Spreu (2 W.). — 96. Reifes Korn. — 97. Gereinigtes Korn. — 98. 99. Vegetabilische Speisen (2 W.) sind zehnfächer Art: 1) eine Wurzel, 2) ein Blatt (wie z. B. das des **nimba**), 3) ein Schuss (wie z. B. der des Bambus), 4) eine Spitze (wie z. B. die einer Schlingpflanze), 5) eine Frucht (wie z. B. die der **vârttâki**), 6) ein Stängel (wie z. B. der des **eraṇḍa**), 7) ein Keim, 8) eine Rinde (wie z. B. die der **dalî**), 9) eine Blume, 10) ein Pilz.

1 तण्डुलीयस्तण्डुलेरो मेघनादोऽल्पमारिषः ॥ ११८४ ॥
2 बिम्बी रक्तफला पीलुपर्णी स्यात्तुण्डिकेरिका ।
3 जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ॥ ११८५ ॥
4 वास्तुकं तु क्षारपत्रं
5 पालक्या मधुसूदनी ।
6 रसोनो लशुनोऽरिष्टो म्लेच्छकन्दो महौषधम् ॥ ११८६ ॥
7 महाकन्दो
8 रसोनोऽन्यो गृञ्जनो दीर्घपत्रकः ।
9 भृङ्गराजो भृङ्गरजो मार्कवः केशरञ्जनः ॥ ११८७ ॥
10 काकमाची वायसी स्या-
11 त्कारवेल्लः कटिल्लकः ।
12 कूष्माण्डकस्तु कर्कारुः
13 कोषातकी पटोलिका ॥ ११८८ ॥
14 चिर्भटी कर्कटी वालुक्यैर्वारुस्त्रपुसी च सा ।
15 अर्शोघ्नः सूरणः कन्दो
16 शृङ्गवेरकमार्द्रकम् ॥ ११८९ ॥
17 कर्कोटकः किलासघ्नस्तिक्तपत्रः सुगन्धकः ।

1. *Amaranthus polygamus* (4 W.). — 2. *Momordica monadelpha* (4 W.). — 3. *Celtis orientalis* (5 W.). — 4. *Chenopodium album* (2 W.). — 5. *Beta bengalensis* (2 W.). — 6. 7. *Allium ascalonicum* (6 W.). — 8. Varietät davon (2 W.). — 9. *Verbesina prostrata* oder *scandens* (4 W.). — 10. *Solanum indicum* (2 W.) — 11. *Momordica charantia* (2 W.). — 12. *Cucurbita pepo* (2 W.). — 13. *Trichosanthes dioeca*, *Luffa acutangula* oder *pentandra* (2 W.). — 14. *Cucumis usitatissimus* (5 W.). — 15. *Arum campanulatum* (3 W.). — 16. Ingwer (2 W.). — 17. *Momordica mixta* (*charantia*) (4 W.).

18 मूलकं तु हरिपर्णी सेकिमं हस्तिदन्तकम् ॥ ११६० ॥
19 तृणं नडादि नीवारादि च
20 शष्पं तु तन्नवम् ।
21 सौगन्धिकं देवजग्धं पौरं कत्तृणरौहिषे ॥ ११६१ ॥
22 दर्भः कुशः कुथो बर्हिः पवित्र-
23 मथ तेजनः ।
24 गुन्द्रो मुञ्जः शरो
25 दूर्वा त्वनन्ता शतपर्विका ॥ ११६२ ॥
26 हरिताली रुहा
27 पोटगलस्तु धमनो नडः ।
28 कुरुविन्दो मेघनामा मुस्ता
29 गुन्द्रा तु सोत्तमा ॥ ११६३ ॥
30 बल्वजा उलपो
31 ऽथेक्षुः स्याद्रसालोऽसिपत्रकः ।
32 भेदाः कान्तारपुण्ड्राद्या-
33 स्तस्य मूलं तु मोरटम् ॥ ११६४ ॥
34 काशस्त्विषीका

18. *Raphanus sativus* (4 W.). — 19. Halmartiges Gewächs, wie naḍa (*Arundo tibialis* oder *karka*) u. s. w. und nîvâra (wilder Ileis) u. s. w. — 20. Junges Gras. — 21. Wohlriechendes Gras (5 W.). — 22. *Poa cynosuroides* (5 W.). — 23. 24. *Saccharum sara* (4 W.). — 25. 26. *Panicum dactylon* (5 W.). — 27. *Arundo tibialis* oder *karka* (3 W.). — 28. *Cyperus rotundus* (3 W.). — 29. *Cyperus pertenuis*. — 30. *Eleusine indica*, *Saccharum cylindricum* (2 W.). — 31. Zuckerrohr (3 W.). — 32. Varietäten davon (2 W.). — 33. Wurzel vom Zuckerrohr. — 34. *Saccharum spontaneum* (2 W.).

35 घासस्तु यवसं

36 तृणमर्जुनम् ।

37 विषः क्ष्वेडो रसस्तीक्ष्णं गरलो

38 ऽथ हलाहलः ॥ ११९५ ॥

39 वत्सनाभः कालकूटो ब्रह्मपुत्रः प्रदीपनः ।

40 सौराष्ट्रिकः शौल्किकेयः काकोलो दारदो ऽपि च ॥ ११९६ ॥

41 अहिच्छत्रो मेषशृङ्गकुष्ठवालुकनन्दनाः ।

42 कैराटको हैमवतो मर्कटः करवीरकः ॥ ११९७ ॥

43 सर्षपो मूलको गौरार्द्रकः सक्तुककर्दमौ ।

44 अङ्कोल्लसारः कालिङ्गः शृङ्गिको मधुसिक्थकः ॥ ११९८ ॥

45 इन्द्रो लाङ्गलिको विस्फुलिङ्गपिङ्गलगौतमाः ।

46 मुस्तको दालवश्चेति स्थावरा विषजातयः ॥ ११९९ ॥

47 कुरण्टाद्या अग्रबीजा

48 मूलजास्तूत्पलादयः ।

49 पर्वयोनय इक्ष्वाद्याः

50 स्कन्धजाः सल्लकीमुखाः ॥ १२०० ॥

51 शाल्यादयो वीजरुहाः

52 संमूर्छजास्तृणादयः ।

35. Wiese, Weide (2 W.). — 36. Gras (2 W.). — 37. Gift (5 W.). — 38 — 46. 34 Am Orte verharrende (vegetabilische) Giftarten. — 47. Kuraṇṭa und andere Pflanzen pflanzen sich durch die Spitze fort. — 48. Die Nymphaeen u. s. w. entspringen aus der Wurzel. — 49. Das Zuckerrohr u. s. w. aus Knoten. — 50. Sallakî (*Boswellia thurifera*) u. s. w. aus dem Stamme. — 51. Çâli (Reis) u. s. w. aus dem Samen. — 52. Gras und Anderes durch Umsichgreifen.

53 स्युर्वनस्पतिकायस्य षडेते मूलजातयः ॥ १२०१ ॥
54 नीलंगुः कृमिरन्तर्जः
55 क्षुद्रः कीटो बहिर्भवः ।
56 पुलकास्तूभये ऽपि स्युः
57 कीकसाः कृमयो ऽणवः ॥ १२०२ ॥
58 काष्ठकीटो घुणो
59 गण्डूपदः किंचुलकः कुसूः ।
60 भूलता
61 गण्डूपदी तु शि-
62 ल्यस्त्रपा जलौकसः ॥ १२०३ ॥
63 जलालोका जलूका च जलौका जलसर्पिणी ।
64 मुक्तास्फोटो ऽब्धिमण्डूकी शुक्तिः
65 कम्बुस्तु वारिजः ॥ १२०४ ॥
66 त्रिरेखः षोडशावर्तः शङ्खो
67 ऽथ क्षुद्रकम्बवः ।
68 शङ्खनकाः क्षुल्लकाश्च
69 शम्बूकास्त्वम्बुमात्रजाः ॥ १२०५ ॥

53. Dies sind die sechs Hauptentstehungsarten der Pflanzenwelt. — 54. Innerlicher Wurm (2 W.). — 55. Kleiner, ausserhalb des Körpers lebender Wurm. — 56. Gemeinschaftlicher Name für beide. — 57. Kleine Würmer oder Insekten. — 58. Holzwurm. — 59. 60. Regenwurm (4 W.). — 61. Kleiner Regenwurm (2 W.). — 62. 63. Blutigel (6 W.). — 64. Perlmuschel (3 W.). — 65. 66. Muschel (5 W.). — 67. 68. Kleine Muscheln (3 W.). — 69. Zweischalige Muscheln, die bloss im Wasser leben.

70 कपर्दस्तु हिरण्यः स्यात्पणास्थिकवराटकौ ।
71 दुर्नामा तु दीर्घकोषी
72 पिपीलकस्तु पीलकः ॥ १२०६ ॥
73 पिपीलिका तु हीनाङ्गी
74 ब्राह्मणी स्थूलशीर्षिका ।
75 घृतेली पिङ्गकपिशा-
76 थोपजिह्वोपदेहिका ॥ १२०७ ॥
77 वम्र्युपदीका
78 लिक्षा तु रिक्षा
79 यूका च षट्पदी ।
80 गोपालिका मल्लाभीरु-
81 र्गोमयोत्था तु गर्दभी ॥ १२०८ ॥
82 मत्कुणस्तु कोलकुण उद्दंशः किटिभोत्कुणौ ।
83 इन्द्रगोपस्त्वग्निरजो वैराटस्तितिभोऽग्निकः ॥ १२०९ ॥
84 ऊर्णनाभस्तन्तुवायो जालिको जालकारकः ।
85 कृमिर्मर्कटको लूता लालास्रावोऽष्टपाच्च सः ॥ १२१० ॥
86 कर्णजलौका तु कर्णकीटा शतपदी च सा ।

70. Kleine Muschel, die als Münze dient (4 W.). — **71.** Kammmuschel (2 W.). — 72. Die grosse schwarze Ameise (2 W.). — 73. Ameise (2 W.). — 74. Ameise mit grossem Kopfe (2 W.). — 75. *A cockroach*, Wils. (2 W.). — 76. 77. Ameisenart (4 W.). — 78. Nisse (2 W.). — 79. Laus (2 W.). — 80. Käferart, die sich im Kuhmist aufhält (2 W.). — 81. Desgleichen (2 W.). — 82. Wanze (5 W.). — 83. *Coccinella* (5 W.). — 84. 85. Spinne (9 W.). — 86. Hundertfuss, *Julus* (3 W.).

87 वृश्चिको द्रुणा ऽल्यालि-
88 ऱ्लं तत्पुच्छकण्टकः ॥ १२११ ॥
89 भ्रमरो मधुकृद्भृङ्गश्चञ्चरीकः शिलीमुखः ।
90 इन्दिन्दिरो ऽली रोलम्बो द्विरेफो
91 ऽस्य षडंह्रयः ॥ १२१२ ॥
92 भोज्यं तु पुष्पमधुनी
93 खद्योतो ज्योतिरिङ्गणः ।
94 पतंगः शलभः
95 क्षुद्रा सरघा मधुमक्षिका ॥ १२१३ ॥
96 माक्षिकादि तु मधु स्या-
97 न्मधूच्छिष्टं तु सिक्थकम् ।
98 वर्वणा मक्षिका नीला
99 पुत्तिका तु पतंगिका ॥ १२१४ ॥
1 वनमक्षिका तु दंशो
2 दंशी तज्जातिरल्पिका ।
3 तैलाटी वरटा गन्धोली स्या-
4 च्चीरी तु चीरुका ॥ १२१५ ॥
5 झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका च सा ।

87. Scorpion (4 W.). — 88. Sein Stachel. — 89. 90. Grosse schwarze Biene (9 W.). — 91. Die Biene hat sechs Füsse. — 92. Blumen und Honig sind ihre Nahrung. — 93. Nachtfalter (2 W.). — 94. Heuschrecke (2 W.). — 95. Biene (3 W.). — 96. Honig. — 97. Wachs (2 W.). — 98. Blaue Fliege. — 99. Kleine Biene (2 W.). — 1. Bremse. — 2. Kleine Bremse. — 3. Wespe (3 W.). — 4. 5. Grille (6 W.).

6 पशुस्तिर्यङ्चरि-

7 र्हिंस्रे ऽस्मिन्व्याल श्वापदो ऽपि च ॥ १२१६ ॥

8 हस्ती मतंगजगजद्विपकर्यनेकपा

9 मातंगवारणमहामृगसामयोनयः ।

10 स्तम्बेरमद्विरदसिन्धुरनागदन्तिनो

11 दन्तावलः करटिकुञ्जरकुम्भिपीलवः ॥ १२१७ ॥

12 इभः करेणुर्गर्जी

13 ऽस्य स्त्री धेनुका वशापि च ।

14 भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ॥ १२१८ ॥

15 काले ऽप्यजातदन्तश्च स्वल्पाङ्गश्चापि मत्कुणो ।

16 पञ्चवर्षो गजो बालः

17 स्यात्पोतो दशवर्षकः ॥ १२१९ ॥

18 विक्को विंशतिवर्षः स्या-

19 त्कलभस्त्रिंशदब्दकः ।

20 यूथनाथो यूथपति-

21 र्मत्ते प्रभिन्नगर्जितौ ॥ १२२० ॥

22 मदोत्कटो मदकलः

6. Grosses vierfüssiges Thier (3 W.). — 7. Raubthier (2 W.) — 8—12. Elephant (23 W.). — 13. Elephantenweibchen (2 W.). — 14. Vier Arten Elephanten. — 15. 1) Ein Elephant, dem die Fangzähne nicht gewachsen sind. 2) Ein Elephant von kleiner Statur. — 16. Fünfjähriger E. — 17. Zehnjähriger E. — 18. Zwanzigjähriger E. — 19. Dreissigjähriger E. — 20. Ein die Heerde anführender Elephant (2 W.). — 21. Brünstiger Elephant (3 W.). — 22. Ein Elephant beim Beginn der Brunstzeit (2 W.).

23 समावुद्वान्तनिर्मदौ ।
24 सज्जितः कल्पित-
25 स्तिर्यग्घाती परिणतो गजः ॥ १२२१ ॥
26 व्यालो दुष्टगजो
27 गम्भीरवेद्यवमताङ्कुशः ।
28 राजवाह्यस्तूपवाह्यः
29 संनाह्यः सनरोचितः ॥ १२२२ ॥
30 उदग्रदन्नीषादन्तो
31 बहूनां घटना घटा ।
32 मदो दानं प्रवृत्तिश्च
33 वमथुः करशीकरः ॥ १२२३ ॥
34 हस्तिनासा करः शुण्डा हस्तो
35 ऽग्रं त्वस्य पुष्करम् ।
36 अङ्गुलिः कर्णिका
37 दन्तौ विषाणौ

23. Ein Elephant nach der Brunstzeit (2 W.). — **24.** Ein zum Kampf gerüsteter Elephant (2 W.). — **25.** Ein Elephant, der eine Bewegung zur Seite macht um zu stossen. — **26.** Fehlerhafter Elephant (2 W.). — **27.** Hartnäckiger Elephant (2 W.). — **28.** Ein Elephant, den ein König reitet (2 W.). — **29.** Kriegselephant (2 W.). — **30.** Ein Elephant mit grossen Fangzähnen (2 W.). — **31.** Die Uebungen eines Elephantentrupps. — **32.** Die Flüssigkeit, die zur Zeit der Brunst aus den Schläfen quillt (3 W.). — **33.** Das Wasser, welches der Elephant zum Rüssel hinauswirft (2 W.). — **34.** Rüssel (4 W.). — **35.** Die Spitze des Rüssels. — **36.** Der kleine Finger am Ende des Rüssels (2 W.). — **37.** Die beiden Fangzähne (2 W.).

38 स्कन्ध आसनम् ॥ १२२४ ॥
39 कर्णमूलं चूलिका स्या-
40 दीषिका त्वक्षिकूटकम् ।
41 अपाङ्गदेशो निर्याणं
42 गण्डस्तु करटः कटः ॥ १२२५ ॥
43 अवग्रहो ललाटं स्या-
44 दासन्तः कुम्भयोरधः ।
45 कुम्भौ तु शिरसः पिण्डौ
46 कुम्भयोरन्तरं विदुः ॥ १२२६ ॥
47 वातकुम्भस्तु तस्याधो
48 वाहित्थं तु ततोऽप्यधः ।
49 वाहित्थाधः प्रतिमानं
50 पुच्छमूलं तु पेचकः ॥ १२२७ ॥
51 दन्तभागः पुरोभागः
52 पक्षभागस्तु पार्श्वतः ।
53 पूर्वस्तु जङ्घादिदेशो गात्रं

38. Widerrist des Elephanten (2 W.). — **39.** Ohrwurzel des E. — **40.** Augapfel des E. — **41.** Ein äusserer Augenwinkel des E. — **42.** Backe des E. (3 W.). — **43.** Stirn des E. — **44.** Die Gegend unterhalb der beiden Erhöhungen auf der Stirn. — **45.** Die beiden Erhöhungen auf der Stirn des E. — **46.** Die dazwischenliegende Gegend. — **47.** Die Gegend unterhalb der letztern. — **48.** Die Gegend unterhalb dieser. — **49.** Die Gegend unterhalb der vorhergehenden, die Gegend zwischen den Fangzähnen. — **50.** Schwanzwurzel des E. — **51.** Das Vordertheil des Kopfes beim E. — **52.** Flanke des E. — **53.** Vordertheil des E.

54 स्यात्पश्चिमो ऽपरा ॥ १२२८ ॥
55 विन्दुजालं पुनः पद्मं
56 शृङ्खलो निगडो ऽन्दुकः ।
57 हिञ्जीरश्च पादपाशो
58 वारिस्तु गजबन्धभूः ॥ १२२९ ॥
59 त्रिपदी गात्रयोर्बन्ध एकस्मिन्नपरे ऽपि च ।
60 तोत्त्रं वेणुक-
61 मालानं बन्धस्तम्भो
62 ऽङ्कुशः सृणिः ॥ १२३० ॥
63 अपठं त्वङ्कुशस्याग्रं
64 यातमङ्कुशवारणम् ।
65 निषादिनां पादकर्म यतं
66 वीतं तु तद्द्वयम् ॥ १२३१ ॥
67 कक्ष्या दूष्या वरत्रा स्या-
68 त्कण्ठबन्धः कलापकः ।

54 Hintertheil des E. — 55. Rothe Flecken auf der Haut des E. — 56. 57. Eine Kette, die an die Füsse des E. gelegt wird (5 W.). — 58. Der Platz, auf dem ein E. angebunden wird. — 59. Ein Gürtel, der sowohl um das Vordertheil als auch um das Hintertheil des E. geschlungen wird. — 60. Ein Stab, mit dem der E. angetrieben wird (2 W.). — 61. Ein Pfosten, an dem ein E. angebunden wird. — 62. Ein Haken, mit dem der E. gestachelt wird (2 W.). — 63. Die Spitze dieses Hakens. — 64. Das Lenken des E. mit dem Haken. — 65. Die Bewegungen der Füsse von Seiten des Elephantenführers beim Lenken des E. — 66. Das Regieren eines E. — 67. Ein Gürtel um den Leib des E. (3 W.). — 68. Ein Strick um den Hals des E. (2 W.).

69 घोटकस्तुरगस्तार्क्ष्यस्तुरंगो ऽश्वस्तुरंगमः ॥ १२३२ ॥
70 गन्धर्वो ऽर्वा सप्तिवीती वाहो वाजी हयो हरिः ।
71 वडवाश्वा प्रसूर्वामी
72 किशोरो ऽल्पवया हयः ॥ १२३३ ॥
73 जवाधिकस्तु जवनो
74 रथ्यो वोढा रथस्य यः ।
75 आजानेयः कुलीनः स्या-
76 त्तत्तद्देशास्तु सैन्धवाः ॥ १२३४ ॥
77 वनायुजाः पारसीकाः काम्बोजा वाह्लिकादयः ।
78 विनीतस्तु साधुवाही
79 दुर्विनीतस्तु शूकलः ॥ १२३५ ॥
80 कश्यः कशार्हो
81 हृद्वक्त्रावर्ती श्रीवत्सकी हयः ।
82 पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ॥ १२३६ ॥
83 पुच्छोरःखुरकेशास्यैः सितैः स्यादष्टमङ्गलः ।
84 सिते तु कर्क्कोकाहो

69. 70. Pferd (14 W.). — 71. Stute (4 W.). — 72. Füllen. — 73. Rennpferd. — 74. Wagenpferd. — 75. Ein Pferd von edler Race (2 W.). — 76. 77. Pferde aus verschiedenen Gegenden (5 W.). — 78. Gut abgerichtetes Pferd. — 79. Hartnäckiges Pferd. — 80. Ein Pferd, welches gepeitscht werden muss. — 81. Ein Pferd, welches auf der Brust und dem Gesicht eine Locke hat. — 82. Ein solches, welches auf der Brust, dem Rücken, dem Gesicht und den Flanken ein Maal hat. — 83. Ein Pferd, bei dem Schweif, Brust, Hufen, Mähne und Gesicht weiss sind. — 84. Schimmel (2 W.).

85 खोङ्गाहः श्वेतपिङ्गले ॥ १२३७ ॥
86 पीयूषवर्णो सेराहः
87 पीते तु हरियो
88 हये ।
89 कृष्णवर्णे तु खुङ्गाहः
90 कियाहो लोहितो हयः ॥ १२३८ ॥
91 ग्रानीलस्तु नीलको
92 ऽथ त्रियूहः कपिलो हयः ।
93 वोल्लाहस्त्वयमेव स्यात्पाण्डुकेशरवालधिः ॥ १२३९ ॥
94 उराहस्तु मनाक्पाण्डुः कृष्णजङ्घो भवेद्यदि ।
95 सुरूहको गर्दभाभो
96 वोरुखानस्तु पाटलः ॥ १२४० ॥
97 कुलाहस्तु मनाक्पीतः कृष्णः स्याद्यदि जानुनि ।
98 उकनाहः पीतरक्तच्छायः स एव तु क्वचित् ॥ १२४१ ॥
99 कृष्णरक्तच्छविः प्रोक्तः
1 शोणः कोकनदच्छविः ।
2 हरिकः पीतहरितच्छायः स एव हालकः ॥ १२४२ ॥

85. Braunschecke. — 86. Milchweisses Pferd. — 87. Gelbes Pferd. — 88. 89. Rappe. — 90. Fuchs. — 91. Ein Rappe, der ins Blaue spielt. — 92. Kastanienbraunes Pferd. — 93. Kastanienbraunes Pferd, dessen Mähne und Schweif hell sind. — 94. Ein helles Pferd mit schwarzen Beinen. — 95. Eselfarbiges Pferd. — 96. Röthlichweisses Pferd. — 97. Gelbliches Pferd mit schwarzen Knieen. — 98. 99. 1) Gelbrothes Pferd, 2) schwarzrothes Pferd. — 1. Hochrothes Pferd. — 2. Gelbgrünes Pferd (2 W.).

3 पङ्गुलः सितकाचाभो

4 हलाहश्चित्रितो हयः।

5 ययुरश्वोऽश्वमेधीयः

6 प्रोथमश्वस्य नासिका ॥ १२४३ ॥

7 मध्यं कश्यं

8 निगालस्तु गलोद्देशः

9 खुराः शफाः।

10 अथ पुच्छं वालहस्तो लाङ्गूलं लोम वालधिः ॥ १२४४ ॥

11 अपावृत्तपरावृत्तलुठितानि तु वेल्लिते।

12 धोरितं वल्गितं प्लुत्युत्तेजितोत्तेरितानि च ॥ १२४५ ॥

13 गतयः पञ्च धाराख्यास्तुरंगाणां क्रमादिमाः।

14 तत्र धोरितकं धौर्यं धोरणं धोरितं च तद् ॥ १२४६ ॥

15 वभ्रुकङ्कशिखिक्रोडगतिव-

16 द्वल्गितं पुनः।

17 अग्रकायसमुल्लासात्कुञ्चितास्यं नतत्रिकम् ॥ १२४७ ॥

18 प्लुतं तु लङ्घनं पक्षिमृगगत्यनुहारकम्।

3. Glasweisses Pferd. — **4.** Scheckiges Pferd. — **5.** Ein Pferd, welches sich zum Açvamedha-Opfer eignet (2 W.). — **6.** Nase des Pferdes. — **7.** Flanke des Pferdes. — **8.** Nacken des Pf. — **9.** Die Hufen des Pf. (2 W.). — **10.** Schweif des Pf. (5 W.). — **11.** Das Wälzen des Pf. (4 W.). — **12. 13.** Die 5 Gänge des Pferdes: der Trab, der Galop, die Curbette, der Gang mit mittlerer Geschwindigkeit und die Carriere. — **14. 15.** Trab, ähnlich dem Gange des Ichneumons, des Reihers, des Pfauen und des Schweines (4 W.). — **16. 17.** Galop, wobei der Vorderkörper in die Höhe gerichtet wird, der Kopf gebeugt und das Ende des Rückens gesenkt. — **18.** Curbette, ähnlich dem Springen der Vögel und Antilopen (2 W.).

19 उत्तेजितं रेचितं स्यान्मध्यवेगेन या गतिः ॥ १२४८ ॥
20 उत्तेरितमुपकण्ठमास्कन्दितकमित्यपि ।
21 उत्प्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः ॥ १२४९ ॥
22 आश्वीनो ऽध्वा स यो ऽश्वेन दिनेनैकेन गम्यते ।
23 कवी खलीनं कविका कवियं मुखयन्त्रणम् ॥ १२५० ॥
24 पञ्चाङ्गी
25 वक्त्रपट्टे तु तलिका तलसारकम् ।
26 दामाञ्चनं पादपाशः
27 प्रक्षरप्रखरौ समौ ॥ १२५१ ॥
28 चर्मदण्डे कशा
29 रश्मौ वल्गावक्षेपणी कुशा ।
30 पर्याणं तु पल्ययनं
31 वीतं फल्गु हयद्विपम् ॥ १२५२ ॥
32 वेसरो ऽश्वतरो वेगसरश्चा-
33 थ क्रमेलकः ।
34 कुलनाशः शिशुनामा शलो भोलिर्मरुप्रियः ॥ १२५३ ॥

19. Der Gang mit mittlerer Geschwindigkeit (2 W.). — **20. 21.** Carriere, wobei das Pferd unter beständigen Sprüngen, als wenn es im Zorn wäre, alle vier Füsse zu gleicher Zeit aufhebt (3 W.). — **22.** Der Weg, den ein Pferd in einem Tage zurückzulegen im Stande ist. — **23. 24.** Gebiss eines Zaumes (6 W.). — **25.** Sprungriemen (2 W.). — **26.** Ein Strick, mit dem die Füsse gebunden werden (2 W.). — **27.** Ein eiserner Harnisch, der dem Pferde umgethan wird (2 W.). — **28.** Peitsche (2 W.). — **29.** Zügel (4 W.). — **30.** Sattel (2 W.). — **31.** Schwaches Pferd oder schwacher Elephant. — **32.** Maulthier (3 W.). — **33—37.** Kameel (18 W.).

35 मयो मह्लाङ्गो वासन्तो द्विककुद्दुर्गलङ्घनः ।
36 भूतघ्न उष्ट्रो दाशेरो रवणः कण्टकाशनः ॥ १२५४ ॥
37 दीर्घग्रीवः केलिकीर्णः
38 करभस्तु त्रिहायणः ।
39 स तु शृङ्खलकः काष्ठमयैः स्यात्पादबन्धनैः ॥ १२५५ ॥
40 गर्दभस्तु चिरमेही बालेयो रासभः खरः ।
41 चक्रीवाञ्शङ्कुकर्णो
42 ऽथ ऋषभो वृषभो वृषः ॥ १२५६ ॥
43 वाडवेयः सौरभेयो भद्रः शक्रशाक्वरौ ।
44 उक्षा नड्वान्ककुद्मान्गोर्वलीवर्दश्च शांकरः ॥ १२५७ ॥
45 उक्षा तु जातो जातोक्षः
46 स्कन्धिकः स्कन्धवाहकः ।
47 महोक्षः स्यादुक्षतरो
48 वृद्धोक्षस्तु जरद्गवः ॥ १२५८ ॥
49 षण्डतोचित आर्षभ्यः
50 कूटो भग्नविषाणकः ।
51 इट्चरो गोपतिः षण्डो गोवृषो मदकोहलः ॥ १२५९ ॥.
52 वत्सः शकृत्करिस्तर्णो

38. Dreijähriges Kameel. — 39. Ein dreijähriges Kameel u hölzernen Klötzen an den Füssen. — 40. 41. Esel (7 W.). — 42—4 Stier (14 W.) — 45. Junger Ochs. — 46. Lastochs (2 W.). — 4 Grosser Ochs (2 W.). — 48. Alter Ochs (2 W.). -- 49. Ein Ocl der geeignet ist freigelassen zu werden. — 50. Ein Ochs mit a gebrochenen Hörnern (2 W.). — 51. Ein Ochs in Freiheit (5 W.). · 52. Kalb (3 W.).

53 दम्यवत्सतरौ समौ ॥

54 नस्योतो नस्तितः

55 षष्ठवाट् तु स्याद्युगपार्श्वगः ॥ १२६० ॥

56 युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः ।

57 स तु सर्वधुरीणः स्यात्सर्वां वहति यो धुरम् ॥ १२६१ ॥

58 एकधुरीणैकधुरावुभावेकधुरावहे ।

59 धुरीणधुर्यधौरेयधौरेयकधुरंधराः ॥ १२६२ ॥

60 धूर्वहे

61 ऽथ गलिर्दुष्टवृषः शक्तो ऽप्यधूर्वहः ।

62 स्थौरी पृष्ठ्यः पृष्ठवाह्यो

63 द्विदन्पोडन्द्विषड्दौ ॥ १२६३ ॥

64 वहः स्कन्धों-

65 ऽसकूटं तु ककुदं

66 नैचिकं शिरः ।

67 विषाणं कूणिका शृङ्गं

53. Ausgewachsener Ochs (2 W.). — 54. Ein Ochs mit durchbohrter Nase (2 W.). — 55. Ein junger Ochs, der schon ins Joch gespannt wird (2 W.). — 56. 1) Ein ins Joch gespannter Ochs. 2) Ein Ochs, der an ein prâsan'ga gespannt wird. 3) Ein Ochs, der an einen Karren gespannt wird. — 57. Ein Ochs, der zu jedem Anspann tauglich ist. — 58. Ein Ochs, der nur für einen besondern Anspann gebraucht wird (3 W.). — 59. 60. Zugochs (6 W.). — 61. Ein kräftiger, aber störriger Ochs, der sich weigert zu ziehen. — 62. Ein Lastochs (3 W.). — 63. 1) Ein junger Ochs mit zwei Zähnen (2 W.). 2) Ein junger Ochs mit sechs Zähnen (2 W.). — 64. Schulter des Ochsen. — 65. Buckel des O. (2 W.). — 66. Kopf des O. — 67. Horn (3 W.).

68 सास्ना तु गलकम्बलः ॥ १२६४ ॥
69 गौः सौरभेयी माहेयी माहा सुरभिरर्जुनी ।
70 उस्राघ्न्या रोहिणी शृङ्गिण्यनड्वाह्यनडुह्युपा ॥ १२६५ ॥
71 तम्पा निलिम्पिका तम्बा
72 सा तु वर्णैरनेकधा ।
73 प्रष्ठौही गर्भिणी
74 वन्ध्या वशा
75 वेहद्वृषोपगा ॥ १२६६ ॥
76 स्रवतोका स्रवद्गर्भा
77 वृषाक्रान्ता तु संधिनी ।
78 प्रौढवत्सा वष्कयिणी
79 धेनुस्तु नवसूतिका ॥ १२६७ ॥
80 परेष्टुर्बहुसूतिः स्या-
81 द्गृष्टिः सकृत्प्रसूतिका ।
82 प्रजने काल्योपसर्या
83 सुखदोह्या तु सुव्रता ॥ १२६८ ॥

68. Wamme des O. (2 W.). — **69—71.** Kuh (16 W.). — **72.** Nach den Farben wird die Kuh mit verschiedenen Namen benannt. — **73.** Trächtige Kuh (2 W.). — **74.** Unfruchtbare Kuh (2 W.). — **75.** Läufische Kuh. — **76.** Eine Kuh, die eine Fehlgeburt gemacht hat. — **77.** Eine Kuh, die sich vom Stier hat bespringen lassen. — **78.** Eine Kuh, die vor längerer Zeit geworfen hat. — **79.** Eine Kuh, die vor Kurzem geworfen hat. — **80.** Eine Kuh, die öfters gekalbt hat. — **81.** Eine Kuh, die nur einmal gekalbt hat. — **82.** Eine ausgewachsene Kuh, die den Stier zulässt (2 W.). — **83.** Eine Kuh, die sich leicht melken lässt.

84 दुष्प्रदोह्या तु करटा
85 बहुदुग्धा तु बञ्जुला ।
86 द्रोणदुग्धा द्रोणदुघा
87 पीनोघ्नी पीवरस्तनी ॥ १२६९ ॥
88 पीतदुग्धा तु धेनुष्या संस्थिता दुग्धबन्धके ।
89 नैचिकी तूत्तमा गोषु
90 पलिक्नी बालगर्भिणी ॥ १२७० ॥
91 समांसमीना तु सा या प्रतिवर्षं विजायते ।
92 स्यादचण्डी तु सुकरा
93 वत्सकामा तु वत्सला ॥ १२७१ ॥
94 चतुस्त्रेर्हायणी द्व्येकाद्धायन्येकादिवर्षिका ।
95 आपीनमूधो
96 गोविट्तु गोमयं भूमिलेपनम् ॥ १२७२ ॥
97 शुष्के तु तत्र गोग्रन्थिः करीषच्छगणो अपि ।
98 गवां सर्वं गव्यं

84. Eine Kuh, die sich ungern melken lässt. — 85. Eine Kuh, die viel Milch giebt (2 W.). — 86. Eine Kuh, die einen droṇa Milch giebt (2 W.). — 87. Eine Kuh mit starken Eutern (2 W.). — 88. Eine Kuh, die angebunden worden ist, um gemelkt zu werden (2 W.). — 89. Die schönste unter den Kühen. — 90. Eine Kuh, die zum ersten Mal trächtig ist. — 91. Eine Kuh, die jedes Jahr kalbt. — 92. Fromme Kuh. — 93. Eine Kuh, die um ihr Kalb besorgt ist (2 W.). — 94. Eine vier-, drei-, zwei- und einjährige Kuh (2 W. für Jedes). — 95. Euter (2 W.). — 96. Kuhmist (3 W.). — 97. Trockener Kuhmist (3 W.). — 98. Alles, was von der Kuh kommt.

99 व्रजे गोकुलं गोधनं धनम् ॥ १२७३ ॥
1 प्रजने स्यादुपसरः
2 कीलः पुष्पलकः शिवः ।
3 वन्धनं दाम संदानं
4 पशुरज्जुस्तु दामनी ॥ १२७४ ॥
5 अजः स्याच्छगलश्छागश्छगो वस्तः स्तभः पशुः ।
6 अजा तु छागिका मञ्जा सर्वभक्षा गलस्तनी ॥ १२७५ ॥
7 युवाजो वर्करो
8 ऽवौ तु मेषोर्णायुहुडोरणाः ।
9 उरभ्रो मेण्ढको वृष्णिरेडको रोमशो हुडुः ॥ १२७६ ॥
10 संपालः शृङ्गिणो भेडो
11 मेषी तु कुररी एडा ।
12 जालकिन्यविला वे-
13 ण्यथेडिक्कः शिशुवाह्लकः ॥ १२७७ ॥
14 पृष्ठशृङ्गो वनाजः स्या-
15 दविदुग्धे त्ववेः परम् ।
16 सोढं दूसं मरीसं च
17 कुक्कुरो चक्रवालधिः ॥ १२७८ ॥

99. Kuhheerde (4 W.). — 1. Brunstzeit (2 W.). — 2. Der Pfosten, an den die Kühe gebunden werden (3 W.). — 3. Strick (3 W.). — 4. Strick, mit dem das Vieh gebunden wird. — 5. Ziegenbock (7 W.). — 6. Ziegen-Weibchen (5 W.). — 7. Junge Ziege. — 8—10. Schafbock (14 W.). — 11. 12. Schafmutter (6 W.). — 13. 14. Wilde Ziege (4 W.). — 15. 16 Schafsmilch (4 W.) — 17—21. Hund (20 W.).

18 अस्थिभुग्भषणः सारमेयः कौलेयकः शुनः ।
19 शुनिः श्वानो गृहमृगः कुक्कुरो रात्रिजागरः ॥ १२७९ ॥
20 रसनालिड्रुतपरः कीलशायिवणान्डुकाः ।
21 शालावृको मृगदंशः श्वा-
22 लर्कस्तु स रोगितः ॥ १२८० ॥
23 विश्वकद्रुस्तु कुशलो मृगव्ये
24 सरमा शुनी ।
25 विड्वरः शूकरे ग्राम्ये
26 महिषो यमवाहनः ॥ १२८१ ॥
27 रजस्वलो वाहरिपुर्लुलायः सैरिभो महः ।
28 धीरस्कन्धः कृतशृङ्गो जरन्तो दंशभीरुकः ॥ १२८२ ॥
29 रक्ताक्षः कासरो हंसकालीतनयलालिकौ ।
30 अरण्यजे ऽस्मिन्गवलः
31 सिंहः कण्ठीरवो हरिः ॥ १२८३ ॥
32 हर्यक्षः केशरी भारिः पञ्चास्यो नखरायुधः ।
33 महानादः पञ्चशिखः पारिन्द्रः पत्यरी मृगात् ॥ १२८४ ॥
34 श्वेतपिङ्गो ऽ-
35 प्यथ व्याघ्रो द्वीपी शार्दूलचित्रकौ ।
36 चित्रकायः पुण्डरीक-
37 स्तरक्षुस्तु मृगादनः ॥ १२८५ ॥

22. Toller Hund. — 23. Ein zur Jagd abgerichteter Hund. — 24. Hündin (2 W.). — 25. Dorfhund. — 26—29. Büffel (15 W.). — 30. Wilder Büffel. — 31—34. Löwe (14 W.). — 35. 36. Tiger (6 W.). — 37. Hyäne (2 W.).

38 शरभः कुञ्जरारातिरुत्पादकोऽष्टपादपि ।

39 गवयः स्याद्वनगवो गोसदृक्षो ऽथवारणः ॥ १२८६ ॥

40 खड्गी वाध्रीणसः खड्गो गण्डको

41 ऽथ किरः किरिः ।

42 भूदारः सूकरः कोलो वराहः क्रोडपोत्रिणौ ॥ १२८७ ॥

43 घोणी घृष्टिः स्तब्धरोमा दंष्ट्री किट्यास्यलाङ्गलो ।

44 आखनिकः शिरोमर्मा स्थूलनासो बहुप्रजः ॥ १२८८ ॥

45 भाल्लूके भालूकर्क्षाच्छभल्लभल्लूकभल्लुकाः ।

46 सृगालो जम्बुकः फेरुः फेरण्डः फेरवः शिवा ॥ १२८९ ॥

47 घोरवासी भूरिमायो गोमायुर्मृगधूर्तकः ।

48 हूरवो भरुजः क्रोष्टा

49 शिवाभेदेऽल्पके किखिः ॥ १२९० ॥

50 पृथौ गृधिरवलोपाको

51 कोकस्त्वीहामृगो वृकः ।

52 अरण्यश्वा

53 मर्कटस्तु कपिः कीशः प्लवंगमः ॥ १२९१ ॥

54 प्लवंगः प्लवगः शाखामृगो हरिर्वलीमुखः ।

55 वनौका वानरो

56 ऽथासौ गोलाङ्गूलो ऽसिताननः ॥ १२९२ ॥

38. Fabelhaftes Thier mit 8 Beinen (4 W.). — 39. *Bos gaveus* (4 W.). — 40. Rhinoceros (4 W.). — 41—44. Schwein (18 W.). — 45. Bär (6 W.). — 46—48. Schakal (13 W.). — 49. Kleinere Species, Fuchs. — 50. Grössere Species (2 W.). — 51. 52. Wolf (4 W.). — 53—55. Affe (11 W.). — 56. Eine Affenart mit schwarzem Gesichte.

57 मृगः कुरंगः सारंगो वातायुर्हरिणावपि ।
58 मृगभेदा रुरुन्यङ्कुरङ्कुगोकर्णशंबराः ॥ १२९३ ॥
59 चमूरुचीनचमराः समूरैणर्श्यरौहिषाः ।
60 कदली कन्दली कृष्णशारः पृषतरोहितौ ॥ १२९४ ॥
61 दक्षिणेर्मा तु स मृगो व्याधैर्यो दक्षिणे क्षतः ।
62 वातप्रमीर्वातमृगः
63 शशस्तु मृदुलोमकः ॥ १२९५ ॥
64 शूलिको लोमकर्णो
65 ऽथ शल्ये शललशल्यकौ ।
66 श्वाविच्च
67 तच्छलाकायां शललं शलमित्यपि ॥ १२९६ ॥
68 गोधा निहाका
69 गौधेरगौधारौ दुष्टतत्सुते ।
70 गौधेयो ऽन्यत्र
71 मुसली गोधिकागोलिके गृहात् ॥ १२९७ ॥
72 माणिक्या भित्तिका पल्ली कुड्यमत्स्यो गृहोलिका ।
73 स्यादञ्जनाधिका हालिन्यञ्जनिका हलाहलः ॥ १२९८ ॥

57. Antilope (5 W.). — 58—60. 17 Species davon. — 61. Eine Antilope, die an der rechten Seite von Jägern verwundet worden ist. — 62. Schnelle Antilope. — 63. 64. Hase (4 W.). — 65. 66. Stachelschwein (4 W.). — 67. Stachel von einem Stachelschwein (2 W.). — 68. *Iguana* (2 W.). — 69. Eine andere Species, die von jener abstammen soll (2 W.). — 70. Eine dritte Species. — 71. 72. Kleine Haus-Eidechse (8 W.). — 73. Eine Eidechsenart (4 W.).

74 स्थूलाञ्जनाधिकायां तु ब्राह्मणी रक्तपुच्छिका ।

75 कृकलासस्तु सरटः प्रतिसूर्यः शयानकः ॥ १२९९ ॥

76 मूषिको मूषको वज्रदशनः खनकोन्दुरौ ।

77 उन्दुरुर्वृष आखुश्च सूच्यास्यो वृषलोचने ॥ १३०० ॥

78 छुच्छुन्दरी गन्धमूष्यां

79 गिरिका बालमूषिका ।

80 विडाल ओतुर्मार्जारो हीकुश्च वृषदंशकः ॥ १३०१ ॥

81 जाहको गात्रसंकोची मण्डली

82 नकुलः पुनः ।

83 पिङ्गलः सर्पहा बभ्रुः

84 सर्पो ऽहिः पवनाशनः ॥ १३०२ ॥

85 भोगी भुजंगभुजगावुरगो द्विजिह्व-

86 व्यालौ भुजंगमसरीसृपदीर्घजिह्वाः ।

87 काकोदरो विषधरः फणभृत्पृदाकु-

88 र्दृक्कर्णकुण्डलिविलेशयदन्दशूकाः ॥ १३०३ ॥

89 दर्वीकरः कञ्चुकिचक्रिगूढपात्पन्नगा जिह्मगलेलिहानौ ।

90 कुम्भीनसाशीविषदीर्घपृष्ठाः

91 स्याद्राजसर्पस्तु भुजंगभोजी ॥ १३०४ ॥

92 चक्रमण्डल्यजगरः पारीन्द्रो वाहसः शयुः ।

74. Eine grössere Species mit einem rothen Schwanze (2 W.). — **75.** Eidechsen-Art, Chamäleon (4 W.). — **76. 77.** Ratze (10 W.). — **78.** Moschusratze, *Sorex moschatus* (2 W.). — **79.** Maus (2 W.). — **80.** Katze (5 W.). — **81.** Iltis, *Viverra putorius* (3 W.). — **82. 83** *Viverra ichneumon* (4 W.). — **84—90.** Schlange (30 W.). — **91** Schlange mit 2 Köpfen (2 W.). — **92.** *Boa constrictor* (5 W.).

93 अलगर्दो जलव्यालः

94 समौ राजिलडुण्डुभौ ॥ १३०५ ॥

95 भवेत्तिलित्सो गोनासो गोनसो घोणसो ऽपि च ।

96 कुर्कुटाहिः कुक्कुटाभो वर्णेन च रवेण च ॥ १३०६ ॥

97 नागाः पुनः काद्रवेया-

98 स्तेषां भोगावती पुरी ।

99 शेषो नागाधिपो ऽनन्तो द्विसहस्राक्ष आलुकः ॥ १३०७ ॥

1 स च श्यामो ऽथवा शुक्लः सितपङ्कजलाञ्छनः ।

2 वासुकिस्तु सर्पराजः श्वेतो नीलसरोजवान् ॥ १३०८ ॥

3 तक्षकस्तु लोहिताङ्गः स्वस्तिकाङ्कितमस्तकः ।

4 महापद्मस्त्वतिशुक्लो दशबिन्दुकमस्तकः ॥ १३०९ ॥

5 शङ्खस्तु पीतो बिभ्राणो रेखामिन्दुसितां गले ।

6 कुलिको ऽर्धचन्द्रमौलिर्ज्वालाधूमसमप्रभः ॥ १३१० ॥

7 अथ कम्बलाश्वतरधृतराष्ट्रबलाहकाः ।

93. Wasserschlange (2 W.). — **94.** *Amphisbaena* (2 W.). — **95.** Eine Schlangenart (4 W.). — **96.** Eine Schlangenart, die von Farbe und im Geschrei einem Hahne gleicht (2 W.). — **97.** Die **Nâga's** in der Unterwelt (2 W.). — **98.** Ihre Stadt. — **99. 1. Çesha**, der König der **Nâga's**, schwarz oder weiss von Farbe; sein Attribut ein weisser Lotus (5 W.). — **2. Vâsuki**, König der Schlangen, weiss von Farbe; sein Attribut ein blauer Lotus (2 W.). — **3. Takshaka**, ein **Nâga**; sein Körper roth, sein Kopf mit dem Zeichen **svastika** geziert. — **4. Mahâpadma**, ein **Nâga**, überaus weiss, mit zehn Flecken auf dem Kopfe — **5. Çan'kha**, ein **Nâga**, ist gelb und hat am Halse einen Streifen, so weiss wie der Mond. — **6. Kulika**, ein **Nâga**, hat einen Halbmond auf dem Kopfe und die Farbe einer mit Rauch gemischten Flamme. — **7. 8. Kambala, Açvatara,**

8 इत्यादयो ऽपरे नागास्तत्तत्कुलसमुद्भवाः ॥ १३११ ॥
9 निर्मुक्तो मुक्तनिर्मोकः
10 सविषा निर्विषाश्च ते ।
11 नागाः स्युर्दृग्विषा
12 लूनविषास्तु वृश्चिकादयः ॥ १३१२ ॥
13 व्याघ्रादयो लोमविषा
14 नखविषा नरादयः ।
15 लालाविषास्तु लूताद्याः
16 कालान्तरविषाः पुनः ॥ १३१३ ॥
17 मूषिकाद्या
18 दूषीविषं त्ववीर्यमौषधादिभिः ।
19 कृत्रिमं तु विषं वारं गरश्चोपविषं च तद् ॥ १३१४ ॥
20 भोगो ऽहिकायो
21 दंष्ट्राशी-
22 र्दर्वी भोगः फटः स्फुटः ।

Dhṛtarâshtra, Balâhaka und andere Nâga's stammen aus dem Geschlecht, nach dem sie benannt worden sind. — 9. Eine Schlange, die sich so eben gehäutet hat. — 10. Einige Schlangen sind giftig, andere nicht. — 11. Die Nâga's haben ihr Gift in den Augen. — 12. Scorpione und andere Thiere in dem sich ablösenden Gliede. — 13. Bei den Tigern u. s. w. ist das Fell giftig. — 14. Bei den Menschen u. s. w. die Nägel. — 15. Bei den Spinnen u. s. w. der Speichel. — 16. 17. Ratzen u. s. w. sind nur zu Zeiten giftig. — 18. Ein Gift, welches durch Heilmittel seine Wirkung verliert. — 19. Künstlich zubereitetes Gift (3 W.). — 20. Der Körper einer Schlange. — 21. Der Zahn einer Schlange. — 22. 23. Der in Gestalt einer Haube aufgerichtete Hals einer Schlange (5 W.).

23 फणो

24 ऽहिकोषे तु निर्ल्वयनीनिर्मोककञ्चुकाः ॥ १३१५ ॥

25 विहगो विहङ्गमखगौ पतगो विहंगः

26 शकुनिः शकुन्तिशकुनौ विचयःशकुन्ताः ।

27 नगसंगमो विकिरपत्त्ररथौ विहायो

28 द्विजपत्त्रिविष्किरपतत्त्रिपतत्पतंगाः ॥ १३१६ ॥

29 पित्सन्नीडाण्डजो ऽगौका-

30 श्चञ्चुश्चञ्चूः सृपाटिका ।

31 त्रोटिश्च

32 पत्त्रं पतत्रं पिच्छं वाजस्तनूरुहम् ॥ १३१७ ॥

33 पक्षो गरुच्छदश्चापि

34 पक्षमूलं तु पक्षतिः ।

35 प्रडीनोड्डीनसंडीनडयनानि नभोगतौ ॥ १३१८ ॥

36 पेशीकोषो ऽण्डे

37 कुलायो नीडे

38 केकी तु सर्पभुक् ।

39 मयूरबर्हिणौ नीलकण्ठो मेघसुहृच्छिखी ॥ १३१९ ॥

40 शुक्लापाङ्गो

41 ऽस्य वाक्केका

24. Eine abgestreifte Schlangenhaut (4 W.). — 25—29 Vogel (25 W.). — 30. 31. Schnabel (4 W.). — 32. 33. Flügel (8 W.). — 34. Die Wurzel des Flügels. — 35. Flug, Fliegen (5 W.). — 36. Vogelei (2 W.). — 37. Nest (2 W.). — 38—40. Pfau (8 W.). — 41. Sein Geschrei.

42 पिच्छं बर्हं शिखण्डकः ।

43 प्रचलाकः कलापश्च

44 मेचकश्चन्द्रकः समौ ॥ १३२० ॥

45 वनप्रियः परभृतस्ताम्राक्षः कोकिलः पिकः ।

46 कलकण्ठः काकपुष्टः

47 काको ऽरिष्टः सकृत्प्रजः ॥ १३२१ ॥

48 आत्मघोषश्चिरंजीवी घूकारिः करटो द्विकः ।

49 एकदृग्बलिभुग्ध्वाङ्क्षो मौकुलिर्वायसो ऽन्यभृत् ॥ १३२२ ॥

50 वृद्धद्रोणाद्दग्धकृष्णपर्वतिभ्यस्त्वसौ परः ।

51 वनाश्रयश्च काकोलो

52 मद्गुस्तु जलवायसः ॥ १३२३ ॥

53 घूके निशाटः काकारिः कौशिकोलूकपेचकाः ।

54 दिवान्धो

55 ऽथ निशावेदी कुक्कुटश्चरणायुधः ॥ १३२४ ॥

56 कृकवाकुस्ताम्रचूडो विवृताक्षः शिखण्डिकः ।

57 हंसाश्चक्राङ्गवक्राङ्गमानसौकःसितच्छदाः ॥ १३२५ ॥

58 राजहंसास्त्वमी चञ्चुचरणैरतिलोहितैः ।

59 मल्लिकाक्षास्तु मलिनै-

42. 43. Sein Schweif (4 W.). — 44. Das Auge in seinem Schweif (2 W.). — 45. 46. *Cuculus indicus* (7 W.). — 47—49. Krähe (14 W.). — 50. 51. Rabe (7 W.). — 52. Seerabe (2 W.). — 53. 54. Eule (7 W.). — 55. 56. Hahn (7 W.). — 57. Gänse (5 W.). — 58. Gänse mit dunkelrothen Schnäbeln und Beinen, Flamingo's. — 59. Gänse mit grauen Schnäbeln und Beinen.

60 धार्तराष्ट्राः सितेतरैः ॥ १३२६ ॥
61 कादम्बास्तु कलहंसाः पक्षैः स्युरतिधूसरैः ।
62 वारला वरला हंसी वारटा वरटा च सा ॥ १३२७ ॥
63 दार्वाघाटः शतपत्रः
64 खञ्जरीटस्तु खञ्जनः ।
65 सारसस्तु लक्ष्मणः स्यात्पुष्कराख्यः कुरंकरः ॥ १३२८ ॥
66 सारसी लक्ष्मणा-
67 थ क्रुङ्क्रौञ्चे
68 चाषे किकीदिविः ।
69 चातकः स्तोकको वप्पीहः सारंगो नभोऽम्बुपः ॥ १३२९ ॥
70 चक्रवाको रथाङ्गाह्वः कोको द्वन्द्वचरोऽपि च ।
71 टिट्टिभस्तु कटुक्वाण उत्पादशयनश्च सः ॥ १३३० ॥
72 चटको गृहबलिभुक्कलविङ्कः कुलिङ्ककः ।
73 योषित्तु तस्य चटका
74 स्त्र्यपत्ये चटका तयोः ॥ १३३१ ॥
75 पुमपत्ये चाटकैरो

60. Gänse mit schwarzen Schnäbeln und Beinen. — **61.** Gänse mit dunkelgrauen Flügeln (2 W.). — **62.** Gänseweibchen (5 W.). — **63.** Specht (2 W.). — **64.** *Motacilla alba* (2 W.). — **65.** *Ardea sibirica* (4 W.). — **66** Das Weibchen davon (2 W.). — **67.** *Ardea jaculator* (2 W.). — **68.** *Coracias indica* (2 W.). — **69.** *Cuculus melanoleucus* (5 W.). — **70.** *Anas casarca* (4 W.). — **71.** *Parra jacana* oder *goensis* (3 W.). — **72.** Sperling (4 W.). — **73.** Sperlingsweibchen. — **74.** 1) Junges Sperlingsweibchen. 2) Altes Sperlingsweibchen. — **75.** Junges Sperlingsmännchen.

76 दात्यूहे कालकण्ठकः ।
77 जलरङ्कुर्जलरङ्को
78 वके कह्वो वकोटवत् ॥ १३३२ ॥
79 वलाहकः स्याद्वलाको
80 वलाका बिसकण्ठिका ।
81 भृंगः कलिङ्गो धूम्याटः
82 कङ्कस्तु कमनच्छदः ॥ १३३३ ॥
83 लोहपृष्ठो दीर्घपादः कर्कटः स्कन्धमल्लकः ।
84 चिल्लः शकुनिरातापी
85 श्येनः पत्त्री शशादनः ॥ १३३४ ॥
86 दाक्षाय्यो दूरदृग्गृध्रो
87 ऽथोत्क्रोशो मत्स्यनाशनः ।
88 कुररः
89 कीरस्तु शुको रक्ततुण्डः फलादनः ॥ १३३५ ॥
90 शारिका तु पीतपादा गोराटी गोकिराटिका ।
91 स्याच्चर्मचटकायां तु जतुकाजिनपत्त्रिका ॥ १३३६ ॥
92 वल्गुलिका मुखविष्ठा परोष्णी तैलपायिका ।
93 कर्करेटुः करेटुः स्यात्करटुः कर्कराटुकः ॥ १३३७ ॥

76. 77. *Gallinula* (4 W.). — 78. *Ardea nivea* (3 W.). — 79. Eine Art Kranich (2 W.). — 80. Desgleichen (2 W.). — 81. *Lanius caerulescens* (3 W.). — 82. 83. Reiher (6 W.). — 84. *Falco cheela* (3 W.). — 85. Habicht oder Falke (3 W.). — 86. Geier (3 W.). — 87. 88. Meeradler (3 W.). — 89. Papagei (4 W.). — 90. *Turdus salica* (4 W.). — 91. Fledermaus (3 W.). — 92. Schabe? (s. 1207, 75.) (4 W.). — 93. Der Numidische Kranich (4 W.).

94 आटिरातिः शरारिः स्या-
95 त्कृकणक्रकरौ समौ ।
96 भासे शकुन्तः
97 कोयष्टी शिखरी जलकुक्कुभः ॥ १३३८ ॥
98 पारापतः कलरवः कपोतो रक्तलोचनः ।
99 ज्योत्स्नाप्रिये चलचञ्चुचकोरविषसूचकाः ॥ १३३९ ॥
1 जीवंजीवस्तु गुन्द्रालो विषदर्शनमृत्युकः ।
2 व्याघ्राटस्तु भरद्वाजः
3 प्लवस्तु गात्रसंप्लवः ॥ १३४० ॥
4 तित्तिरिस्तु खरकोणो
5 हारीतस्तु मृदंकुरः ।
6 कारण्डवस्तु मल्लः
7 सुगृहश्चञ्चुसूचिकः ॥ १३४१ ॥
8 कुम्भकारकुक्कुटस्तु कुक्कुभः कुक्कुवास्वनः ।
9 पक्षिणा येन गृह्यन्ते पक्षिणोऽन्ये स दीपकः ॥ १३४२ ॥
10 छेका गृह्याश्च ते गेहासक्ता ये मृगपक्षिणः ।
11 मत्स्यो मीनः पृथुरोमा झषो वैसारिणोऽण्डजः ॥ १३४३ ॥

94. *Turdus gingintanus* (3 W.). — **95**. *Perdix sylvatica* (2 W.). — **96**. ? (2 W.). — **97**. Kibitz (3 W.). — **98**. Taube (4 W.). — **99**. *Perdix rufa* (4 W.). — **1**. Eine Art Fasan (3 W.). — **2**. Feldlerche (2 W.). — **3**. *Pelicanus fusicollis* (2 W.). — **4**. Eine Art Rebhuhn (2 W.). — **5**. *Columba hartala* (2 W.). — **6**. Eine Art Ente (2 W.). — **7**. *Sylvia sutoria* (2 W.). — **8**. *Phasianus gallus* (3 W.). — **9**. Raubvogel. — **10**. Hausthiere (2 W.). — **11—13**. Fisch (16 W.).

12 संघचारी स्थिरजिह्व आत्माशी स्वकुलक्षयः ।
13 विसारः शकली शल्की शंवरो ऽनिमिषस्तिमिः ॥ १३४४ ॥
14 सहस्रदंष्ट्रे वादालः
15 पाठीने चित्रवल्लिकः ।
16 शकुले स्यात्कलको
17 ऽथ गडकः शकुलार्भकः ॥ १३४५ ॥
18 उलूपी शिशुके
19 प्रोष्ठीशफरी श्वेतकोलके ।
20 नलमीनश्चिलिचिमो
21 मत्स्यराजस्तु रोहितः ॥ १३४६ ॥
22 मद्गुरस्तु राजशृङ्गः
23 शृङ्गी तु मद्गुरप्रिया ।
24 क्षुद्राण्डमत्स्यजातं तु पोताधानं जलाणुकम् ॥ १३४७ ॥
25 महामत्स्यास्तु चीरल्लितिमिंगिलगिलादयः ।
26 अथ यादांसि नक्राद्या हिंसका जलजन्तवः ॥ १३४८ ॥
27 नक्रः कुम्भीर आलास्यः कुम्भी महामुखो ऽपि च ।
28 तालुजिह्वः शङ्खमुखो गोमुखो जलशूकरः ॥ १३४९ ॥

14. *Silurus pelorius* (2 W.). — 15. *Silurus boalis* (2 W.). — 16. *Ophiocephalus lata?* (2 W.). — 17. Junger *Ophiocephalus lata*. — 18. Meerschwein (2 W.). — 19. *Cyprinus sophore* (3 W.). — 20. *Clupea cultrata?* (2 W.). — 21. *Cyprinus rohita* (2 W.). — 22. *Macropteronatus magur* (2 W.). — 23. Das Weibchen davon. — 24. Fischbrut (2 W.). — 25. Der K'ralli, Timiṅgilagila und andere. — 26. Das Krokodil und andere wasserbewohnende Raubthiere. — 27. 28. Krokodil (9 W.).

29 शिशुमारस्त्वम्बुकूर्म उग्रवीर्यो महावसः ।
30 उद्रस्तु जलमार्जारः पानीयनकुलो वसी ॥ १३५० ॥
31 ग्राहे तन्तुस्तन्तुनागो ऽवहारो नागतन्तुणौ ।
32 अन्ये ऽपि यादोभेदाः स्युर्बहवो मकरादयः ॥ १३५१ ॥
33 कुलीरः कर्कटः पिङ्गचक्षुः पार्श्वोदरप्रियः ।
34 द्विधागतिः षोडशांह्रिः कुरुचिल्लो बहिश्चरः ॥ १३५२ ॥
35 कच्छपः कमठः कूर्मः क्रोडपादश्चतुर्गतिः ।
36 पञ्चाङ्गुप्तो दौलेयो जीवथः
37 कच्छपी डुली ॥ १३५३ ॥
38 मण्डूके हरिशालूरप्लवभेकप्लवंगमाः ।
39 वर्षाभूः प्लवगः शालुरजिह्मव्यङ्गदर्दुराः ॥ १३५४ ॥
40 स्थले नराद्या ये तु ते जले जलपूर्वकाः ।
41 अण्डजाः पक्षिसर्पाद्याः
42 पोतजाः कुञ्जरादयः ॥ १३५५ ॥
43 रसजा मद्यकीटाद्या
44 नृगवाद्या जरायुजाः ।

29. *Delphinus gangeticus* (4 W.). — **30.** Fischotter (4 W.). — **31.** Haifisch (6 W.). — **32.** Es giebt noch viele andere Arten wasserbewohnender Raubthiere, wie der Makara u. s. w. — **33. 34.** Krebs (8 W.). — 35. 36. Schildkröte (8 W.). — **37.** Schildkrötenweibchen (2 W.). — 38. 39. Frosch (12 W.). — **40.** Menschen u. s. w. bewohnen das Festland; wenn aber das Wort g'ala «Wasser» davorsteht, so sind dieselben Wasserbewohner. — **41.** Vögel, Schlangen und andere Thiere entstehen aus Eiern. — **42.** Elephanten u. s. w. aus einem Mutterleibe ohne Uterus. — **43.** Essigthierchen u. s. w. aus Flüssigkeiten. — **44.** Menschen, Kühe u. s. w. aus einem Uterus.

45 यूकाद्याः स्वेदजा

46 मत्स्याद्यः संमूर्छनोद्भवाः ॥ १३५६ ॥

47 खञ्जनास्तूद्भिदो

48 ऽथोपपादुका देवनारकाः ।

49 त्रसयोनय इत्यष्टा-

50 वुद्भिदुद्भिज्जमुद्भिदम् ॥ १३५७ ॥

॥ इत्याचार्यहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां तिर्यक्काण्डश्चतुर्थः ॥

---

51 स्युर्नारकास्तु परेतप्रेतयात्यातिवाहिकाः ।

52 आजूर्विष्टि-

53 र्यातना तु कारणा तीव्रवेदना ॥ १३५८ ॥

54 नरकस्तु नारकः स्यान्निरयो दुर्गतिश्च सः ।

55 घनोदधिघनवाततनुवातनभःस्थिताः ॥ १३५९ ॥

45. Läuse u. s. w. aus warmer Feuchtigkeit. — **46.** Fische u. s. w. durch Umsichgreifen. — **47.** Bachstelzen u. s. w. sprossen aus der Erde hervor. — **48.** Götter und die Bewohner der Unterwelt entstehen von selbst. — **49.** Dies sind die acht Geburtsstätten der Wesen, die ihren Ort verändern können. — **50.** Aus der Erde hervorsprossend (3 W.). — **51.** Bewohner der Unterwelt (5 W.). — **52.** Die Verstossung in die Unterwelt (2 W.). — **53.** Die Qualen in der Unterwelt (2 W.). — **54.** Unterwelt (4 W.). — **55—58.** Die 7 Abtheilungen der Unterwelt (Ratnaprabhâ u. s. w.) befinden sich in einem dicken Ocean, in dickem Winde, in dünnem Winde oder in der Luft. Jede folgende liegt tiefer als die vorhergehende und ist auch geräumiger.

56 रत्नशर्करावालुकापङ्कधूमतमःप्रभा ।

57 महातमःप्रभा चेत्यधो ऽधो नरकभूमयः ॥ १३६० ॥

58 क्रमात्पृथुतराः सप्ता-

59 थ त्रिंशत्पञ्चविंशतिः ।

60 पञ्चदश दश त्रीणि लक्षाण्यूनं च पञ्चभिः ॥ १३६१ ॥

61 लक्षं पञ्चैव नरकावासाः सीमन्तकादयः ।

62 एतासु स्युः क्रमेणा-

63 थ पातालं वडवामुखम् ॥ १३६२ ॥

64 वलिवेश्माधोभुवनं नागलोको रसातलम् ।

65 रन्ध्रं विलं निर्व्यथनं कुहरं शुषिरं शुषिः ॥ १३६३ ॥

66 छिद्रं रोपं विवरं च निम्नं रोकं वपान्तरम् ।

67 गर्तश्वभ्रावटागाधदरास्तु विवरे भुवः ॥ १३६४ ॥

॥ इत्याचार्यहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां नरककाण्डः पञ्चमः ॥

---

68 स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत् ।

69 जीवाजीवाधारक्षेत्रं लोको

70 ऽलोकस्ततो ऽन्यथा ॥ १३६५ ॥

59—62. In der 1ten Abtheilung hausen 3,000,000 Höllenbewohner und an deren Spitze Sîmantaka; in der 2ten 2,500,000; in der 3ten 1,500,000; in der 4ten 1,000,000; in der 5ten 300,000; in der 6ten 99,995; in der 7ten nur 5. — 63. 64. Pâtâla, Aufenthaltsort der Nâga's (6 W.). — 65. 66. Höhle (13 W.). — 67. Loch in der Erde (5 W.). — 68. Weltall (6 W.). — 69. Die materielle Welt. — 70. Die übersinnliche Welt.

71 क्षेत्रज्ञ आत्मा पुरुषश्चेतनः

72 स पुनर्भवी ।

73 जीवः स्यादसुमान्सत्त्वं देहभृज्जन्तुजन्तवः ॥ १३६६ ॥

74 उत्पत्तिर्जन्मजनुषी जननं जनिरुद्भवः ।

75 जीवे ऽसुजीवितप्राणा

76 जीवातुर्जीवनौषधम् ॥ १३६७ ॥

77 श्वासस्तु श्वसितं

78 सो ऽन्तर्मुख उच्छ्वास आहरः ।

79 आनो

80 बहिर्मुखस्तु स्यान्निश्वासः पान एतनः ॥ १३६८ ॥

81 आयुर्जीवितकालो

82 ऽन्तःकरणं मानसं मनः ।

83 हृच्चेतो हृदयं चित्तं स्वान्तं गूढपथोच्चले ॥ १३६९ ॥

84 मनसः कर्म संकल्पः स्या-

85 दृथो शर्म निर्वृतिः ।

86 सातं सौख्यं सुखं

87 दुःखं त्वसुखं वेदना व्यथा ॥ १३७० ॥

88 पीडा बाधार्त्तिराभीलं कृच्छ्रं कष्टं प्रसूतिजम् ।

89 आमनस्यं प्रगाढं च

71. Seele (4 W.). — 72. 73. Ein mit Leben begabtes Wesen (7 W.). — 74. Geburt (6 W.). — 75. Lebensgeister (4 W.). — 76 Belebungsmittel (2 W.). — 77. Athmen (2 W.). — 78. 79. Einathmen (3 W.). — 80. Ausathmen (3 W.). — 81. Lebensdauer (2 W.).— 82. 83. Geist, Vernunft (10 W.). — 84. Denken. — 85. 86. Freude Glück (5 W.). — 87—89. Schmerz, Unglück (13 W.).

90 स्यादाधिर्मानसी व्यथा ॥ १३७१ ॥
91 सपत्नाकृतिनिष्पत्नाकृती त्वत्यन्तपीडने ।
92 क्षुज्जठराग्निजा पीडा
93 व्यापादो द्रोहचिन्तनम् ॥ १३७२ ॥
94 उपज्ञा ज्ञानमाद्यं स्या-
95 च्चर्चा संख्या विचारणा ।
96 वासना भावना संस्कारोऽनुभूताद्यविस्मृतिः ॥ १३७३ ॥
97 निर्णयो निश्चयोऽन्तः
98 संप्रधारणा समर्थनम् ।
99 अविद्याहंमत्यज्ञाने
1 भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ १३७४ ॥
2 संदेहद्वापरारेका विचिकित्सा च संशयः ।
3 परभागो गुणोत्कर्षो
4 दोषे त्वादीनवास्रवौ ॥ १३७५ ॥
5 स्याद्रूपं लक्षणं भावश्चात्मप्रकृतिरीतयः ।
6 सहजो रूपतत्त्वं च धर्मः सर्गो निसर्गवत् ॥ १३७६ ॥
7 शीलं सतत्त्वं संसिद्धि-
8 रवस्था तु दशा स्थितिः ।

90. Seelenschmerz. — **91.** Heftiger körperlicher Schmerz (2 W.). — **92.** Hunger. — **93.** Böse Absicht (2 W.). — **94.** Die Kenntniss, zu der man durch sich selbst gelangt ist. — **95.** Ueberlegen (3 W.). — **96.** Bewusstsein des Erlebten (3 W.). — **97.** Entschluss (3 W.). — **98.** Abwägen (2 W.). — **99.** Unwissenheit (3 W.). — **1.** Täuschung (3 W.). — **2.** Zweifel (5 W.). — **3.** Vorzüge (2 W.). — **4.** Fehler (3 W.). — **5—7.** Die Natur eines Dinges (14 W.). — **8.** Zustand (3 W.).

9 स्नेहः प्रीतिः प्रेम हार्दं

10 दाक्षिण्यं त्वनुकूलता ॥ १३७७ ॥

11 विप्रतिसारो ऽनुशयः पश्चात्तापो ऽनुतापश्च ।

12 अवधानसमाधानप्रणिधानानि तु समाधौ स्युः ॥ १३७८ ॥

13 धर्मः पुण्यं वृषः श्रेयः सुकृते

14 नियतौ विधिः ।

15 दैवं भाग्यं भागधेयं दिष्टं चा-

16 यस्तु तच्छुभम् ॥ १३७९ ॥

17 अलक्ष्मीर्निर्ऋतिः कालकर्णिका स्या-

18 दथाशुभम् ।

19 दुष्कृतं दुरितं पापमेनः पाप्मा च पातकम् ॥ १३८० ॥

20 किल्बिषं कलुषं किण्वं कल्मषं वृजिनं तमः ।

21 अंहः कल्कमघं पङ्क

22 उपाधिर्धर्मचिन्तनम् ॥ १३८१ ॥

23 त्रिवर्गो धर्मकामार्था-

24 श्चतुर्वर्गः समोक्षकाः ।

25 बलतुर्याश्चतुर्भद्रं

9. Zuneigung (4 W.). — 10. Freundlichkeit (2 W.). — 11. Reue (4 W.). — 12. Andacht (4 W.). — 13. Verdienst, gutes Werk (5 W.). — 14. 15. Geschick (6 W.). — 16. Gutes Geschick. — 17. Böses Geschick (3 W.). — 18—21. Sünde (17 W.). — 22. Das Nachdenken über das Gute (2 W.). — 23. Das Gute, das Angenehme und das Nützliche. — 24. Das Gute, das Angenehme, das Nützliche und die letzte Erlösung. — 25. Das Gute, das Angenehme, das Nützliche und die Kraft.

26 प्रमादो ऽनवधानता ॥ १३८२ ॥
27 छन्दो ऽभिप्राय आकूतं मतभावाशया अपि ।
28 हृषीकमक्षं करणं स्रोतः खं विषयीन्द्रियम् ॥ १३८३ ॥
29 बुद्धीन्द्रियं स्पर्शनादि
30 पाण्यादि तु क्रियेन्द्रियम् ।
31 स्पर्शादयस्त्विन्द्रियार्था विषया गोचरा अपि ॥ १३८४ ॥
32 शीते तुषारः शिशिरः सुशीमः शीतलो जडः ।
33 हिमो
34 ऽथोष्णे तिग्मस्तीव्रस्तीक्ष्णश्चण्डः खरः पटुः ॥ १३८५ ॥
35 कोष्णः कवोष्णः कदुष्णो मन्दोष्णश्चेषदुष्णवत् ।
36 निष्ठुरः कक्खटः क्रूरः परुषः कर्कशः खरः ॥ १३८६ ॥
37 दृढः कठोरः कठिनो जरठः
38 कोमलः पुनः ।
39 मृदुलो मृदुसोमालसुकुमारा अकर्कशः ॥ १३८७ ॥
40 मधुरस्तु रसज्येष्ठो गुल्यः स्वादुर्मधूलकः ।
41 अम्लस्तु पाचनो दन्तशठो
42 ऽथ लवणः सरः ॥ १३८८ ॥
43 सर्वरसो

26. Unachtsamkeit (2 W.). — 27. Meinung, Absicht (6 W.). — 28. Sinnesorgan (7 W.). — 29. Ein wahrnehmendes Sinnesorgan, wie das Gefühl u. s. w. — 30. Ein handelndes Sinnesorgan, wie die Hände u. s. w. — 31. Die Objekte der wahrnehmenden Sinnesorgane: das Gefühl u. s. w. (3 W.). — 32. 33. Kalt (7 W.). — 34. Heiss (7 W.). — 35. Lau (5 W.). — 36. 37. Hart (10 W.). — 38. 39. Weich (6 W.). — 40. Süss (5 W.). — 41. Sauer (3 W.). — 42. 43. Salzig (3 W.).

44 ऽथ कटुः स्यादोषणो मुखशोधनः ।
45 वक्त्रभेदी तु तिक्तो
46 ऽथ कषायस्तुवरो
47 रसः ॥ १३८९ ॥
48 गन्धो जनमनोहारी
49 सुरभिर्घ्राणतर्पणः ।
50 समाकर्षी निर्हारी च
51 स आमोदो विदूरगः ॥ १३९० ॥
52 विमर्दोत्थः परिमलो
53 ऽथामोदी मुखवासनः ।
54 इष्टगन्धः सुगन्धिश्च
55 दुर्गन्धः पूतिगन्धिकः ॥ १३९१ ॥
56 आमगन्धि तु विस्रं स्या-
57 द्वर्णाः श्वेतादिका अमी ।
58 श्वेतः श्येतः शुक्लो हरिणो विशदः शुचिः ॥ १३९२ ॥
59 अवदातगौरशुभ्रवलक्षधवलार्जुनाः ।
60 पाण्डुरः पाण्डरः पाण्डु-

44. Scharf (3 W.). — 45. Bitter (2 W.). — 46. Zusammenziehend (2 W.). — 47. Geschmack. — 48. Der Geruch entzückt die Herzen der Menschen. — 49. 50. Ueberaus wohlriechend (4 W.). — 51. Ein sich weit verbreitender Wohlgeruch. — 52. Ein durch Reiben sich entwickelnder Wohlgeruch. — 53. 54. Wohlriechend (4 W.). — 55. Uebelriechend (2 W.). — 56. Nach rohem Fleisch riechend (2 W.). — 57. Die Farben, weiss u. s. w., sind folgende. — 58—60. Weiss (16 W.).

61 ईषत्पाण्डुस्तु धूसरः ॥ १३६३ ॥
62 कापोतस्तु कपोताभः
63 पीतस्तु सितरञ्जनः ।
64 हारिद्रः पीतलो गौरः
65 पीतनीलः पुनर्हरित् ॥ १३६४ ॥
66 पालाशो हरितस्तालकाभो
67 रक्तस्तु रोहितः ।
68 माञ्जिष्ठो लोहितः शोणः
69 श्वेतरक्तस्तु पाटलः ॥ १३६५ ॥
70 अरुणो बालसंध्याभः
71 पीतरक्तस्तु पिञ्जरः ।
72 कपिलः पिङ्गलः श्यावः पिशङ्गः कपिशो हरिः ॥ १३६६ ॥
73 बभ्रुः कद्रुः कडारश्च पिङ्गे
74 कृष्णस्तु मेचकः ।
75 स्याद्रामः श्यामलः श्यामः कालो नीलोऽसितः शितिः ॥ १३६७ ॥
76 रक्तश्यामे पुनर्धूम्रधूमला-
77 वथ कर्बुरः ।
78 किर्मीर एतः शबलश्चित्रकल्माषचित्रलाः ॥ १३६८ ॥
79 शब्दो निनादो निर्घोषः स्वानो ध्वानः स्वरो ध्वनिः ।

61. Weisslich, hellgrau. — 62. Grau (2 W.). — 63. 64. Gelb (5 W.). — 65. 66. Grün (5 W.). — 67. 68. Roth (5 W.). — 69. Hellroth (2 W.). — 70. Von der Farbe der Morgenröthe. — 71—73. Orange (12 W.). — 74. 75. Schwarz (9 W.). — 76. Dunkelroth (3 W.). — 77. 78. Bunt (7 W.). — 79—82. Laut, Ton (27 W.).

80 निह्रादो निनदो ह्रादो निस्वानो निस्वनः स्वनः ॥ १३९९ ॥

81 रवो नादः स्वनिर्घोषः संव्याङ्भ्यो राव आरवः ।

82 क्वणनं निक्वणः क्वाणो निक्वाणश्च क्वणो रणः ॥ १४०० ॥

83 षड्जर्षभगान्धारा मध्यमः पञ्चमस्तथा ।

84 धैवतो निषादः सप्त तन्त्रीकण्ठोद्भवाः स्वराः ॥ १४०१ ॥

85 ते मन्द्रमध्यताराः स्युरुरःकण्ठशिरोभवाः ।

86 रुदितं क्रन्दितं क्रुष्टं

87 तदपुष्टं तु गद्गदः ॥ १४०२ ॥

88 शब्दो गुणानुरागोत्थः प्रणादः सीत्कृतं नृणाम् ।

89 पर्दनं गुदजे शब्दे

90 कर्दनं कुक्षिसंभवे ॥ १४०३ ॥

91 क्ष्वेडा तु सिंहनादो

92 ऽथ क्रन्दनं सुभटध्वनिः ।

93 कोलाहलः कलकल-

94 स्तुमुलो व्याकुलो रवः ॥ १४०४ ॥

95 मर्मरो वस्त्रपत्रादे-

96 र्भूषणानां तु शिञ्जितम् ।

83. 84. Die 7 Töne der Saiteninstrumente und der menschlichen Kehle. — 85. Je nachdem dieselben aus der Brust, der Kehle oder dem Kopfe ausgestossen werden, heissen sie *tiefe*, *mittlere* oder *hohe* Töne. — 86. Schluchzen (3 W.). — 87. Leises Schluchzen. — 88. Beifallzuruf (2 W.). — 89 Furz. — 90. Knurren in den Eingeweiden. — 91. Das Gebrüll des Löwen (2 W.). — 92. Das herausfordernde Geschrei von Kriegern. — 93. Geschrei (2 W.). — 94. Verworrenes Geschrei. — 95. Das Rauschen von Kleidern, Blättern u. s. w. — 56. Das Klingen von Schmucksachen

97 हेषा ह्रेषा तुरंगाणां

98 गजानां गर्जवृंहिते ॥ १४०५ ॥

99 विस्फारो धनुषां

1 हम्भारम्भे गो-

2 र्जलदस्य तु ।

3 स्तनितं गर्जितं गर्जिः स्वनितं रसितादि च ॥ १४०६ ॥

4 कूजितं स्याद्विहंगानां

5 तिरश्चां रुतवाशिते ।

6 वृकस्य रेषणं रेषा

7 बुक्कनं भषणं शुनः ॥ १४०७ ॥

8 पीडितानां तु कणितं

9 मणितं रतकूजितम् ।

10 प्रक्वाणः प्रक्वणस्तन्त्र्या

11 मर्दलस्य तु गुन्दलः ॥ १४०८ ॥

12 चीजनं तु कीचकानां

13 भेर्या नादस्तु दर्दुरः ।

97. Das Wiehern der Pferde (2 W.). — 98. Das Gebrüll der Elephanten (2 W.). — 99. Das Summen des Bogens. — 1. Das Brüllen der Kühe (2 W.). — 2. 3. Donner (5 W.). — 4. Das Zwitschern der Vögel. — 5. Das Geschrei der vierfüssigen Thiere und Vögel (2 W.). — 6. Das Geheul des Wolfes (2 W.). — 7. Das Gebell des Hundes (2 W.). — 8. Wehgeschrei. — 9. Der Laut, den man beim Beischlaf von sich giebt. — 10. Der Ton der Saiten (2 W.). — 11. Der Laut eines **mardala** (Art Trommel). — 12. Das Pfeifen des Bambusrohrs. — 13. Der Laut einer Pauke.

14 तारो ऽत्युच्चैर्ध्वनि-

15 मन्द्रो गम्भीरो

16 मधुरः कलः ॥ १४०९ ॥

17 काकली तु कलः सूक्ष्म

18 एकतालो लयानुगः ।

19 काकुर्ध्वनिविकारः स्या-

20 त्प्रतिश्रुत्तु प्रतिध्वनिः ॥ १४१० ॥

21 संघाते प्रकरौघवारनिकरव्यूहाः समूहश्चयः

22 संदोहः समुदायराशिविसरव्राताः कलापो व्रजः ।

23 कूटं मण्डलचक्रबालपटलस्तोमा गणाः पेटकं

24 वृन्दं चक्रकदम्बके समुदयः पुञ्जोत्करौ संहतिः ॥ १४११ ॥

25 समवायो निकुरम्बं जालं निवहसंचयौ ।

26 जातं

27 तिरश्चां तद्यूथं

28 संघसार्थौ तु देहिनाम् ॥ १४१२ ॥

29 कुलं तेषां सजातीनां

30 निकायस्तु सधर्मणाम् ।

31 वर्गस्तु सदृशां

14. Sehr hoher Ton. — **15.** Tiefer Ton. — **16.** Lieblicher Ton. — **17.** Leiser und lieblicher Ton. — **18.** Harmonie (2 W). — **19.** Wechsel der Stimme. — **20.** Widerhall (2 W.). — **21—26.** Menge (35 W.). — **27.** Heerde. — **28.** Eine Menge lebender Wesen (2 W.). — **29.** Eine Menge lebender Wesen von derselben Species. — **30.** Eine Versammlung von Menschen, die gleichen Pflichten obliegen. — **31.** Eine Anzahl gleichartiger Dinge.

32 स्कन्धो नरकुञ्जरवाजिनाम् ॥ १४१३ ॥
33 ग्रामो विषयशब्दास्त्रभूतेन्द्रियगुणाद्व्रजे ।
34 समजस्तु पशूनां स्या-
35 त्समाजस्त्वन्यदेहिनाम् ॥ १४१४ ॥
36 शुकादीनां गणो शौकमायूरतैत्तिरादयः ।
37 भिक्षादेर्भैक्षसाहस्रगार्भिणयौवनादयः ॥ १४१५ ॥
38 गोत्रार्थप्रत्ययान्तानां स्युरौपगवकादयः ।
39 उक्षादेरौक्षकं मानुष्यकं वार्द्धकमौष्ट्रकम् ॥ १४१६ ॥
40 स्याद्राजपुत्रकं राजन्यकं राजकमाजकम् ।
41 वात्सकौरभ्रके
42 कावचिकं कवचिनामपि ॥ १४१७ ॥
43 हास्तिकं तु हस्तिनां स्या-
44 दापूपिकाद्यचेतसाम् ।
45 धेनूनां धैनुकं

32. Eine Menge von Menschen, Elephanten oder Pferden. — 33. Verein, Gesammtes, in Verbindung mit vishaja u. s. w. — 34. Heerde grosser vierfüssiger Thiere. — 35. Ein Verein von andern lebenden Wesen. — 36. Eine Schaar Papageien, Pfauen, Rebhühner u. s. w. — 37. Eine Ansammlung von Almosen, von Tausenden; eine Versammlung von schwangeren Frauen, von jungen Frauen u. s. w. — 38. Eine Versammlung von Nachkömmlingen des Upagu u. s. w. — 39 – 41. Eine Anzahl Ochsen, Menschen, Greise, Kameele, Prinzen, Kshattrija's, Könige, Ziegen, Kälber, Schafe. — 42. Eine Versammlung gewappneter Männer. — 43. Eine Heerde Elephanten. — 44. Ein Haufen Kuchen u. s. w. — 45. Eine Heerde von Kühen, die vor Kurzem gekalbt haben.

46 धेन्वत्तानां गौधेनुकादयः ॥ १४१८ ॥
47 कैदारकं कैदारिकं कैदार्यमपि तद्गणे ।
48 ब्राह्मणादेर्ब्राह्मण्यं माणव्यं वाडव्यमित्यपि ॥ १४१९ ॥
49 गणिकानां तु गाणिक्यं
50 केशानां कैश्यकैशिके ।
51 अश्वानामाश्वमश्वीयं
52 पर्शूनां पार्श्वम-
53 प्यथ ॥ १४२० ॥
54 वातूलवात्ये वातानां
55 गव्यागोत्रे पुनर्गवाम् ।
56 पाश्यागल्यादि पाशादेः
57 खलादेः खलिनीनिभाः ॥ १४२१ ॥
58 जनता बन्धुता ग्रामता गजता सहायता ।
59 जनादीनां
60 रथानां तु स्याद्रथ्या रथकड्यया ॥ १४२२ ॥
61 राजिर्लेखा ततिर्वीथी मालात्यावलिपङ्क्तयः ।
62 धोरणी श्रे-

46. Eine Heerde Ochsen und Kühe u. s. w. — 47. Eine Anzahl Felder (3 W.). — 48. Eine Menge von Brahmanen (2 W.) und Kindern. — 49. Eine Versammlung von Huren. — 50. Starker Haarwuchs (2 W.). — 51. Ein Trupp Pferde (2 W.). — 52. Verein der Ribben, Seite. — 53. 54. Andrang von Wind, Orkan (2 W.). — 55. Eine Heerde Kühe (2 W.). — 56. Eine Menge Schlingen, Stricke u. s. w. — 57. Eine Anzahl Dreschfluren u. s. w. — 58. 59. Eine Menge von Menschen, Verwandten, Dörfern, Elephanten, Gefährten. — 60. Eine Menge Wagen (2 W.). — 61. 62. Reihe (10 W.).

63 उभौ तु द्वौ
64 युगलं द्वितयं द्वयम् ॥ १४२३ ॥
65 युगं द्वैतं यमं द्वन्द्वं युग्मं यमलयामले ।
66 पशुभ्यो गोयुगं युग्मे परं
67 षट्के तु षड्गवम् ॥ १४२४ ॥
68 परःशताद्यास्ते येषां परा संख्या शतादिकात् ।
69 प्राज्यं प्रभूतं प्रचुरं बहुलं बहु पुष्कलम् ॥ १४२५ ॥
70 भूयिष्ठं पुरुहं भूयो भूर्यदभ्रं पुरु स्फिरम् ।
71 स्तोकं क्षुल्लं तुच्छमल्पं दभ्राणुतलिनानि च ॥ १४२६ ॥
72 तनु क्षुद्रं कृशं
73 सूक्ष्मं पुनः श्लक्ष्णं च पेलवम् ।
74 त्रुटौ मात्रा लवो लेशः कणो
75 ह्रस्वं पुनर्लघु ॥ १४२७ ॥
76 अत्यल्पे ऽल्पिष्ठमल्पीयः कनीयो ऽणीय इत्यपि ।
77 दीर्घायते समे
78 तुङ्गमुच्चमुन्नतमुद्धुरम् ॥ १४२८ ॥
79 प्रांशूच्छ्रितमुदग्रं च
80 न्यग्नीचं ह्रस्वमन्थरे ।

63. Zwei (2 W.). — 64. 65. Paar (10 W.). — 66. Paar, am Ende eines Compositums nach dem Namen eines grossen vierfüssigen Thieres. — 67. Ein Verein von 6, in demselben Falle. — 68. Ueber hundert u. s. w. — 69. 70. Viel (13 W.). — 71. 72. Wenig (10 W.). — 73. Fein (3 W.). — 74. Ein bischen (5 W.). — 75. Kurz (2 W.). — 76. Sehr wenig (5 W.). — 77. Lang (2 W.). — 78. 79. Hoch (7 W.). — 80. 81. Niedrig, kurz (7 W.).

81 खर्वं कुब्जं वामनं च

82 विशालं तु विशङ्कटम् ॥ १४२९ ॥

83 पृथूरु पृथुलं व्यूढं विकटं विपुलं बृहत् ।

84 स्फारं वरिष्ठं विस्तीर्णं ततं बहु महद्गुरु ॥ १४३० ॥

85 दैर्घ्यमायाम आनाह

86 आरोहस्तु समुच्छ्रयः ।

87 उत्सेध उदयोच्छ्रायौ

88 परिणाहो विशालता ॥ १४३१ ॥

89 प्रपञ्चाभोगविस्तारव्यासाः

90 शब्दे स विस्तरः ।

91 समासस्तु समाहारः संक्षेपः संग्रहो ऽपि च ॥ १४३२ ॥

92 सर्वं समस्तमन्यूनं समग्रं सकलं समम् ।

93 विश्वाशेषाखण्डकृत्स्नान्यूनानि निखिलाखिले ॥ १४३३ ॥

94 खण्डे ऽर्धशकले भित्तं नेमशल्कदलानि च ।

95 अंशो भागश्च वण्टः स्या-

96 त्पादस्तु स तुरीयकः ॥ १४३४ ॥

97 मलिनं कच्चरं म्लानं कश्मलं च मलीमसम् ।

98 पवित्रं पावनं पूतं पुण्यं मेध्य-

99 मथोज्ज्वलम् ॥ १४३५ ॥

82—84 Breit (16 W.). — 85. Länge (3 W.). — 86. 87. Höhe (5 W.). — 88. Breite (2 W.). — 89. Fülle, Ausdehnung (4 W.). — 90. Weitschweifigkeit in der Rede. — 91. Kürze, Gedrängtheit (4 W.). — 92. 93. Alles (13 W.). — 94. Hälfte (7 W.). — 95. Theil (3 W.). — 96. Viertel. — 97. Schmutzig (5 W.). — 98. Rein (5 W.). — 99—2. Glänzend rein (8 W.).

1 विमलं विशदं वीध्रमवदातमनाविलम् ।
2 विशुद्धं शुचि चो-
3 क्षं तु निःशोध्यमनवस्करम् ॥ १४३६ ॥
4 निर्णिक्तं शोधितं मृष्टं धौतं क्षालितमित्यपि ।
5 संमुखीनमभिमुखं
6 पराचीनं पराग्मुखम् ॥ १४३७ ॥
7 मुख्यं प्रकृष्टं प्रमुखं प्रवर्हं वर्यं वरेण्यं प्रवरं पुरोगम् ।
8 अनुत्तरं प्राग्रहरं प्रवेकं प्रधानमग्रेसरमुत्तमाग्रे ॥ १४३८ ॥
9 ग्रामण्यग्रण्यग्रिमजात्याग्र्यानुत्तमान्यनवरार्ध्यं वरे ।
10 प्रष्ठपरार्ध्यपराणि
11 श्रेयसि तु श्रेष्ठसत्तमे पुष्कलत्वत् ॥ १४३९ ॥
12 स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
13 सिंहशार्दूलनागाद्यास्तल्लजश्च मतल्लिका ॥ १४४० ॥
14 मचर्चिका प्रकाण्डोद्घौ प्रशस्यार्थप्रकाशकाः ।
15 गुणोपसर्जनोपाग्राण्यप्रधाने
16 ऽधमं पुनः ॥ १४४१ ॥
17 निकृष्टमणाकं गर्ह्यमवद्यं काण्डकुत्सिते ।
18 अपकृष्टं प्रतिकृष्टं पाप्यं रेफो ऽवमं ब्रुवम् ॥ १४४२ ॥
19 खेटं पापमपशदं कुपूयं चेलमर्व च ।

3. Sauber (3 W.). — 4. Gereinigt, gewaschen (5 W.). — 5. Zugewandt (2 W.). — 6. Abgewandt (2 W.). — 7—10. Vorzüglich (26 W.). — 11. Bestes (4 W.). — 12—14. Zwölf Worte, welche am Ende eines Compositums die Vorzüglichkeit des vorangehenden Begriffes ausdrücken. — 15. Untergeordnet (4 W.). — 16—19. Niedrig, verachtet (19 W.).

20 तदासेचनकं यस्य दर्शनाद्दृग्न तृप्यति ॥ १४४३ ॥
21 चारु हारि रुचिरं मनोहरं वल्गु कान्तमभिराममबन्धुरे ।
22 वामरुच्यसुषमाणि शोभनं मञ्जुमञ्जुलमनोरमाणि च ॥ १४४४ ॥
23 साधुरम्यमनोज्ञानि पेशलं हृद्यसुन्दरे ।
24 काम्यं कम्रं कमनीयं सौम्यं च मधुरं प्रियम् ॥ १४४५ ॥
25 व्युष्टिः फल-
26 मसारं तु फल्गु
27 शून्यं तु रिक्तकम् ।
28 शुन्यं तुच्छं वसिकं च
29 निविडं तु निरन्तरम् ॥ १४४६ ॥
30 निविरीसं घनं सान्द्रं नीरन्ध्रं बहलं दृढम् ।
31 गाढमविरलं चा-
32 थ विरलं तनु पेलवम् ॥ १४४७ ॥
33 नवं नवीनं सद्यस्कं प्रत्यग्रं नूत्ननूतने ।
34 नव्यं चाभिनवे
35 जीर्णे पुरातनं चिरन्तनम् ॥ १४४८ ॥
36 पुराणं प्रतनं प्रत्नं जर-
37 न्मूर्तं तु मूर्तिमत् ।
38 उच्चावचं नैकभेद-
39 मतिरिक्ताधिके समे ॥ १४४९ ॥

20. Woran sich das Auge nicht satt sehen kann. — 21—2 Schön (17 W.). — 25. Erfolg (2 W.). — 26. Erfolglos (2 W.). - 27. 28. Leer (5 W.). — 29—31. Dicht, grob (10 W.). — 32. Undich fein (3 W.). — 33. 34. Neu (8 W.). — 35. 36. Alt (7 W.). - 37. Gestaltet (2 W.). — 38. Verschiedenartig (2 W.). — 39 Uebe mässig, überzählig (2 W.).

40 पार्श्वं समीपं सविधं ससीमाभ्याशं सवेशान्तिकसंनिकर्षाः ।
41 सदेशमभ्यग्रसनीडसंनिधानान्युपान्तं निकटोपकण्ठे ॥ १४५० ॥
42 संनिकृष्टसमर्यादाभ्यर्णान्यासन्नसंनिधी ।
43 अव्यवहिते ऽनन्तरं संसक्तमपटान्तरम् ॥ १४५१ ॥
44 नेदिष्ठमन्तिकतमं
45 विप्रकृष्टपरे पुनः ।
46 दूरे
47 ऽतिदूरे दविष्ठं दवीयो
48 ऽथ सनातनम् ॥ १४५२ ॥
49 शाश्वतानश्वरे नित्यं ध्रुवं
50 स्थेयस्त्वतिस्थिरम् ।
51 स्थास्नु स्थेष्ठं
52 तत्कूटस्थं कालव्याप्येकरूपतः ॥ १४५३ ॥
53 स्थावरं जङ्गमादन्य-
54 ज्जङ्गमं तु त्रसं चरम् ।
55 चराचरं जगदिङ्गं चरिष्णु चा-
56 थ चञ्चलम् ॥ १४५४ ॥
57 तरलं कम्पनं कम्प्रं परिप्लवचलाचले ।
58 चटुलं चपलं लोलं चलं पारिप्लवास्थिरे ॥ १४५५ ॥

40—42. Nähe (20 W.). — **43.** Anstossend (4 W.). — **44.** Ganz nahe (2 W.). — **45. 46.** Entfernt (3 W.). — **47.** Sehr entfernt (3 W.). — **48. 49.** Immerwährend (5 W.). — **50. 51.** Dauerhaft (4 W.). — **52.** Ewig und unveränderlich. — **53.** Unbeweglich. — **54.** 55. Beweglich (7 W.). — **56—58.** Sich hin und her bewegend (12 W.).

59 ऋज्वावजिह्मप्रगुणा-

60 ववाग्रे ऽवनतानते ।

61 कुञ्चितं नतमाविद्धं कुटिलं वक्रवेल्लिते ॥ १४५६ ॥

62 वृजिनं भङ्गुरं भुग्नमरालं जिह्ममूर्मिमत् ।

63 अनुगे ऽनुपदान्वक्षान्व-

64 ञ्येकाकेक एककः ॥ १४५७ ॥

65 एकतानायनसर्गाग्र्याण्येकाग्र्यं च तद्गतम् ।

66 अनन्यवृत्त्येकायनगतं चा-

67 ग्र्यमादिमम् ॥ १४५८ ॥

68 पौरस्त्यं प्रथमं पूर्वमादिरग्रम-

69 थान्तिमम् ।

70 जघन्यमन्त्यं चरममन्तः पाश्चात्त्यपश्चिमे ॥ १४५९ ॥

71 मध्यमं माध्यमं मध्यमीयं माध्यंदिनं च तद् ।

72 अभ्यन्तरमन्तरालं विचाले

73 मध्यमन्तरे ॥ १४६० ॥

74 तुल्यः समानः सदृक्षः सरूपः सदृशः समः ।

75 साधारणसधर्माणौ सवर्णः संनिभः सदृक् ॥ १४६१ ॥

76 स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः ।

59. Gerade (3 W.). — 60. Gebeugt (3 W.). — 61. 62 Krumm (12 W.). — 63. Nachfolgend (4 W.). — 64. Allein (3 W.). — 65. 66. Seine Aufmerksamkeit auf einen Gegenstand gerichtet habend (8 W.). — 67. 68. Anfang, erster (7 W.). — 69. 70. Ende, letzter (7 W.). — 71. In der Mitte gelegen (4 W.). — 72. Zwischenraum (3 W.). — 73 Mitte (2 W.). — 74. 75. Gleich (11 W.). — 76. 77. Gleich, am Ende eines Compositums (11 W.).

77 भूतरूपोपमाः काशः संनीप्रप्रतितः परः ॥ १४६२ ॥
78 औपम्यमनुकारो ऽनुहारः साम्यं तुलोपमा ।
79 कृतोपमान-
80 मर्चा तु प्रतिमा यातना निधिः ॥ १४६३ ॥
81 छाया छन्दः कायो रूपं बिम्बं मानकृती अपि ।
82 सूर्मी स्थूणायःप्रतिमा
83 हरिणी स्याद्धिरण्मयी ॥ १४६४ ॥
84 प्रतिकूलं तु विलोममपसव्यमपष्ठुरम् ।
85 वामं प्रसव्यं प्रतीपं प्रतिलोममपष्ठु च ॥ १४६५ ॥
86 वामं शरीरे ऽङ्गं सव्य-
87 मपसव्यं तु दक्षिणम् ।
88 अबाधोच्छृङ्खलोद्दामान्यपच्छितमनर्गलम् ॥ १४६६ ॥
89 निरङ्कुशे
90 स्फुटे स्पष्टं प्रकाशं प्रकटोल्बणे ।
91 व्यक्तं
92 वर्तुलं तु वृत्तं निस्तलं परिमण्डलम् ॥ १४६७ ॥
93 बन्धुरं तून्नतानतं
94 स्थपुटं विषमोन्नतम् ।
95 अन्यदन्यतरद्भिन्नं त्वेकमितरच्च तद् ॥ १४६८ ॥

78. 79. Gleichheit (8 W.). — 80. 81. Bild (11 W.). — 82. Ein Bild aus Eisen (3 W.). — 83. Ein Bild aus Gold (2 W.). — 84. 85. Widrig (9 W.). — 86. Link (2 W.). — 87. Recht (2 W.). — 88. 89. Frei (6 W.). — 90. 91. Klar, offenbar (6 W.). — 92. Rund (4 W.). — 93. Wellenförmig (2 W.). — 94. Uneben und hoch zugleich (2 W.). — 95. Verschieden (6 W.).

96 करम्बः कबरो मिश्रः संपृक्तः खचितः समाः ।
97 विविधस्तु बहुविधो नानारूपः पृथग्विधः ॥ १४६९ ॥
98 त्वरितं सत्वरं तूर्णं शीघ्रं क्षिप्रं द्रुतं लघु ।
99 चपलाविलम्बिते च
1 रम्पा संपातपाटवम् ॥ १४७० ॥
2 अनारतं त्वविरतं संसक्तं सततानिशे ।
3 नित्यानवरताजस्रासक्ताश्रान्तानि संततम् ॥ १४७१ ॥
4 साधारणं तु सामान्यं
5 दृढसंधि तु संहतम् ।
6 कलिलं गहने
7 संकीर्णे तु संकुलमाकुलम् ॥ १४७२ ॥
8 कीर्णमाकीर्णं च
9 पूर्णे त्वाचितं छन्नपूरिते ।
10 भरितं निचितं व्याप्तं
11 प्रत्याख्याते निराकृतम् ॥ १४७३ ॥
12 प्रत्यादिष्टं प्रतिक्षिप्तमपविद्धं निरस्तवत् ।
13 परिक्षिप्ते वलयितं निवृतं परिवेष्टितम् ॥ १४७४ ॥
14 परिष्कृतं परीतं च

96. Gemischt (5 W.). — 97. Mannigfaltig (4 W.). — 98. 99. Eilig (9 W.). — 1. Geschicklichkeit im Springen (2 W.). — 2. 3. Ununterbrochen (11 W.). — 4. Gemeinsam (2 W.). — 5. Fest, verbunden (2 W.). — 6. Undurchdringlich (2 W.). — 7. 8. Unter einander geworfen (5 W.). — 9. 10. Voll, gefüllt (7 W.). — 11. 12. Verschmäht (6 W.). — 13 14. Umgeben (6 W.).

15 त्यक्तं तूत्सृष्टमुज्झितम् ।
16 धूतं हीनं विधुतं च
17 विन्नं वित्तं विचारिते ॥ १४७५ ॥
18 अवकीर्णे त्ववध्वस्तं
19 संवीते रुद्धमावृतम् ।
20 संवृतं पिहितं छन्नं स्थगितं चापवारितम् ॥ १४७६ ॥
21 अन्तर्हितं तिरोहित-
22 मन्तर्धिस्त्वपवारणम् ।
23 छदनव्यवधान्तर्धापिधानस्थगनानि च ॥ १४७७ ॥
24 व्यवधानं तिरोधानं
25 दर्शितं तु प्रकाशितम् ।
26 आविष्कृतं प्रकटित-
27 मुच्चण्डं त्ववलम्बितम् ॥ १४७८ ॥
28 अनादृतमवज्ञातं मानितं गणितं मतम् ।
29 रीढावज्ञावहेलान्यसूर्क्षणं चाप्यनादरे ॥ १४७९ ॥
30 उन्मूलितमावर्हितं स्यादुत्पाटितमुद्धृतम् ।
31 प्रेङ्खोलितं तरलितं लुलितं प्रेङ्खितं धुतम् ॥ १४८० ॥
32 चलितं कम्पितं धूतं वेल्लितान्दोलिते अपि ।
33 दोला प्रेङ्खोलनं प्रेङ्खा

15. 16. Verlassen (6 W.). — 17. Geprüft (3 W.). — 18. Zerstreut (2 W.). — 19—21. Verhüllt, versteckt (10 W.). — 22—24. Verhüllen, Verstecken (9 W.). — 25. 26. Enthüllt (4 W.). — 27. Hangend (2 W.). — 28. Verachtet (5 W.). — 29. Verachtung (5 W.). — 30. Entwurzelt (4 W.). — 31. 32. Geschwungen (10 W.). — 33. Schwinge (3 W.).

34 फाण्टं कृतमयत्नतः ॥ १४८१ ॥
35 अधःक्षिप्तं न्यक्चितं स्या-
36 दूर्ध्वक्षिप्तमुदञ्चितम् ।
37 नुन्ननुत्तास्तनिष्ठ्यूतान्याविद्धं क्षिप्तमीरितम् ॥ १४८२ ॥
38 स्यो दिग्धलिप्ते
39 रुग्णभुग्ने
40 रूषितगुण्ठिते ।
41 गूढगुप्ते च
42 मुषितमूषिते
43 गुणिताहते ॥ १४८३ ॥
44 स्यान्निशातं शितं शातं निशितं तेजितं क्ष्णुतम् ।
45 वृते तु वृत्तव्यावृत्तौ
46 ह्रीतह्रीणौ तु लज्जिते ॥ १४८४ ॥
47 संगूढः स्यात्संकलिते
48 संयोजित उपाहिते ।
49 पक्वं परिणतं
50 पाके क्षीराज्यहविषां शृतम् ॥ १४८५ ॥
51 निष्पक्वं क्वथिते

34. Ohne Mühe zubereitet. — 35. Herabgeworfen (2 W.). 36. Hinaufgeworfen (2 W.). — 37. Geworfen (7 W.). — 38. Beschmiert (2 W.). — 39. Gebogen (2 W.). — 40. Zerstäubt (2 W.). 41. Versteckt (2 W.). — 42. Gestohlen (2 W.). — 43. Multiplicirt (2 W.). — 44. Geschärft (6 W.). — 45. Erwählt (3 W.). — 46. Beschämt (3 W.). — 47. Aufgehäuft (2 W.). — 48. Verbunden (2 W.). 49. Reif (2 W.). — 50. Gekocht (Milch u. s. w.). — 51. Gesotten u. s. w. (2 W.).

52 प्लुष्टप्रुष्टदग्धोषिताः समाः ।
53 तनूकृते त्वष्टतष्टौ
54 विद्धे छिद्रितवेधितौ ॥ १४८६ ॥
55 सिद्धे निर्वृत्तनिष्पन्नौ
56 विलीने द्रुतविद्रुतौ ।
57 ऊतं प्रोते
58 स्यूतमूतमुतं च तन्तुसंतते ॥ १४८७ ॥
59 पाटितं दारितं भिन्ने
60 विदरः स्फुटनं भिदा ।
61 अङ्गीकृतं प्रतिज्ञातमूरीकृतोररीकृते ॥ १४८८ ॥
62 संश्रुतमभ्युपगतमुररीकृतमाश्रुतम् ।
63 संगीर्णं प्रतिश्रुतं च
64 छिन्ने लूनं छितं दितम् ॥ १४८९ ॥
65 छेदितं खण्डितं वृक्णं कृत्तं
66 प्राप्तं तु भावितम् ।
67 लब्धमासादितं भूतं
68 पतिते गलितं च्युतम् ॥ १४९० ॥
69 स्रस्तं भ्रष्टं स्कन्नपन्ने
70 संशितं तु सुनिश्चितम् ।

52. Gebrannt (4 W.). — 53. Beschnitten (3 W.). — 54. Durchbohrt (3 W.). — 55. Vollendet (3 W.). — 56. Geschmolzen (3 W.). — 57. Gewebt (2 W.). — 58. Genäht (4 W.). — 59. Zerrissen (3 W.). — 60. Zerreissen (3 W.). — 61—63. Versprochen (10 W.). — 64. 65. Zerbrochen (8 W.). — 66 67. Erhalten (5 W.). — 68. 69. Gefallen (7 W.). — 70. Bestimmt, festgesetzt (2 W.).

71 मृगितं मार्गितान्विष्टान्वेषितानि गवेषिते ॥ १४६१ ॥
72 तिमिते स्तिमितक्लिन्नसार्द्रार्द्रोन्नाः समुन्नवत् ।
73 प्रस्थापितं प्रतिशिष्टं प्रहितप्रेषिते अपि ॥ १४६२ ॥
74 ख्याते प्रतीतप्रज्ञातवित्तप्रथितविश्रुताः ।
75 तप्ते संतापितो दूनो धूपायितश्च धूपितः ॥ १४६३ ॥
76 शीने स्त्यान-
77 मुपनतस्तूपसन्न उपस्थितः ।
78 निर्वातस्तु गते वाते
79 निर्वाणः पावकादिषु ॥ १४६४ ॥
80 प्रवृद्धमेधितं प्रौढं
81 विस्मृतान्तर्गते समे ।
82 उद्वान्तमुद्गते
83 गूनं हन्ने
84 मीढं तु मूत्रिते ॥ १४६५ ॥
85 विदितं बुधितं बुद्धं ज्ञातं सितगते अवात् ।
86 मनितं प्रतिपन्नं च
87 स्यन्ने रीणं स्नुतं स्रुतम् ॥ १४६६ ॥
88 गुप्तगोपायितत्रातावितत्राणानि रक्षिते ।

71. Gesucht (5 W.). — 72. Nass (7 W.). — 73. Abgeschied (4 W.). — 74. Bekannt (6 W.). — 75. Gequält (5 W.). — 76. Geronnen, dick geworden (2 W.). — 77. Nahe gebracht (3 W.). — 78. Windstille. — 79. Ausgelöscht. — 80. Ausgewachsen (3 W.). — 81. Vergessen (2 W.). — 82. Ausgebrochen, übergeben (2 W.). — 83. Geschissen (2 W.). — 84. Gepisst (2 W.). — 85. 86. Gekann (8 W.). — 87. Tröpfelnd (4 W.). — 88. Geschützt (6 W.).

89 कर्म क्रिया विधा

90 हेतुशून्या त्वास्या विलक्षणम् ॥ १४९७ ॥

91 कार्मणं मूलकर्मा-

92 थ संवननं वशक्रिया ।

93 प्रतिबन्धे प्रतिष्टम्भः स्या-

94 दास्यात्वासना स्थितिः ॥ १४९८ ॥

95 परस्परं स्यादन्योऽन्यमितरेतरमित्यपि ।

96 आवेशाटोपौ संरम्भे

97 निवेशो रचना स्थितौ ॥ १४९९ ॥

98 निर्बन्धोऽभिनिवेशः स्या-

99 त्प्रवेशोऽन्तर्विगाहनम् ।

1 गतौ वीङ्खा विहारेर्यापरिसर्पपरिक्रमाः ॥ १५०० ॥

2 व्रज्याटाट्या पर्यटनं

3 चर्या त्वीर्या पथस्थितिः ।

4 व्यत्यासस्तु विपर्यासो वैपरीत्यं विपर्ययः ॥ १५०१ ॥

5 व्यत्ययो

6 ऽथ स्फातिर्वृद्धौ

7 प्रीणनेऽवनतर्पणे ।

89. Handlung (3 W.). — 90. Unerklärlicher Zustand. — 91. Zauberkunst (2 W.). — 92. Bezaubern (2 W.). — 93. Hinderniss (2 W.). — 94. Aufenthalt, Wohnen (4 W.). — 95. Gegenseitig (3 W.). — 96. Stolz (3 W.). — 97. Schlachtordnung (3 W.). — 98. Beharrlichkeit (2 W.). — 99. Hineingehen (2 W.). — 1. Gehen (6 W.). — 2. Herumstreichen (3 W.). — 3. Erfüllung eines Gelübdes (2 W.). — 4. 5. Umgekehrtes Verhältniss (5 W.). — 6. Wachsen (2 W.). — 7. Befriedigung (3 W.).

8 परित्राणं तु पर्याप्तिर्हस्तधारणमित्यपि ॥ १५०२ ॥
9 प्रणतिः प्रणिपातोऽनुनये
10 ऽथ शयने क्रमात् ।
11 विशाय उपशायश्च
12 पर्यायोऽनुक्रमः क्रमः ॥ १५०३ ॥
13 परिपाट्यानुपूर्व्यावृ-
14 दतिपातस्त्वतिक्रमः ।
15 उपात्ययः पर्ययश्च
16 समौ संबाधसंकटौ ॥ १५०४ ॥
17 कामं प्रकामं पर्याप्तं निकामेष्टे यथेप्सिते ।
18 अत्यर्थे गाढमुद्गाढं वाढं तीव्रं भृशं दृढम् ॥ १५०५ ॥
19 अतिमात्रातिमर्यादनितान्तोत्कर्षनिर्भराः ।
20 भरैकान्तातिवेलातिशया
21 जृम्भा तु जृम्भणम् ॥ १५०६ ॥
22 आलिङ्गनं परिष्वङ्गः संश्लेष उपगूहनम् ।
23 अङ्कपाली परीरम्भः क्रोडीकृति-
24 रथोत्सवे ॥ १५०७ ॥
25 महः क्षणोद्धवोद्धर्षा
26 मेलके संगसंगमौ ।

8. Selbstvertheidigung (3 W.). — 9. Begrüssung (3 W.). — 10. 11 Abwechselndes Schlafen (2 W.). — 12. 13. Reihe, Ordnung (6 W.). - 14. 15. Versäumniss (4 W). — 16. Enge (2 W.). — 17. Nac Wunsch (6 W.). — 18—20. Uebermaass, sehr (16 W.). — 21 Gäh nen (2 W.). — 22. 23. Umarmung (7 W.). — 24. 25. Festta (5 W.). — 26. Zusammenkunft (3 W.).

27 अनुग्रहो ऽभ्युपपत्तिः
28 समौ निरोधनिग्रहौ ॥ १५०८ ॥
29 विघ्ने ऽन्तरायप्रत्यूहव्यवायाः
30 समये क्षणः ।
31 वेलावारावसरः प्रस्तावः प्रक्रमो ऽन्तरम् ॥ १५०९ ॥
32 अभ्यादानमुपोद्घात आरम्भः प्रोपतः क्रमः ।
33 प्रत्युत्क्रमः प्रयोगः स्या-
34 दारोहणं त्वभिक्रमः ॥ १५१० ॥
35 आक्रमे ऽधिक्रमक्रान्ती
36 व्युत्क्रमस्तूत्क्रमो ऽक्रमः ।
37 विप्रलम्भो विप्रयोगो वियोगो विरहः समाः ॥ १५११ ॥
38 आभा छटा विभूषा श्रीरभिख्याकान्तिविभ्रमाः ।
39 लक्ष्मीश्छाया च शोभायां
40 सुषमा सातिशायिनी ॥ १५१२ ॥
41 संस्तवः स्यात्परिचय
42 आकारस्त्विङ्ग इङ्गितम् ।
43 निमित्ते कारणं हेतुर्बीजं योनिर्निबन्धनम् ॥ १५१३ ॥
44 निदान-

27. Gunst (2 W.). — 28. Abneigung (2 W.). — 29. Hinderniss (4 W.). — 30. 31. Gelegenheit (8 W.). — 32. Beginn (5 W.). — 33. Der erste Schritt bei einer Handlung (2 W.). — 34. Hinaufsteigen (2 W.). — 35. Angriff (3 W.). — 36. Verwirrung, Unordnung (3 W.). — 37. Trennung (4 W.). — 38. 39. Glanz, Schönheit (10 W.). — 40. Ausgezeichnete Schönheit. — 41. Bekanntschaft (2 W.). — 42. Geberde, als Ausdruck der innern Stimmung (3 W.) — 43. 44. Grund (7 W.).

45 अथ कार्यं स्यादर्थः कृत्यं प्रयोजनम् ।
46 निष्ठानिर्वहणे तुल्ये
47 प्रवाहो गमनं वहिः ॥ १५१४ ॥
48 जातिः सामान्यं
49 व्यक्तिस्तु विशेषः पृथगात्मिका ।
50 तिर्यक्साचिः
51 संहर्षस्तु स्पर्धा
52 द्रोहस्त्वपक्रिया ॥ १५१५ ॥
53 वन्ध्ये मोघाफलमुधा
54 अन्तर्गडुर्निरर्थकम् ।
55 संस्थानं संनिवेशः स्या-
56 दर्थस्यापगमे व्ययः ॥ १५१६ ॥
57 संमूर्छनं त्वभिव्याप्ति-
58 र्भ्रेषो भ्रंशो यथोचितात् ।
59 अभावो नाशे
60 संक्रामसंक्रमौ दुर्गसंचरे ॥ १५१७ ॥
61 नीवाकस्तु प्रयामः स्या-
62 दवेक्षा प्रतिजागरः ।

45. Zweck (4 W.). — 46. Beschluss (2 W.). — 47. Hervorströmen. — 48. Gattung (2 W.). — 49. Individuum (3 W.). — 50. Horizontale Lage (2 W.). — 51. Neid (2 W.). — 52. Beleidigung (2 W.). — 53. Fruchtlos (4 W.). — 54. Unnütz (2 W.). — 55. Zubereitung (2 W.). — 56. Verausgaben. — 57. Allseitiges Durchdringen (2 W.). — 58. Ablenken vom rechten Wege. — 59. Zu Grunde gehen (2 W.). — 60. Schwieriger Durchgang (3 W.). — 61. Theuerung (2 W.). — 62. Vorsorge (2 W.).

63 समौ विश्रम्भविश्वासौ

64 परिणामस्तु विक्रिया ॥ १५१८ ॥

65 चक्रावर्तो भ्रमो भ्रान्तिर्भ्रमिर्घूर्णिश्च घूर्णने ।

66 विप्रलम्भो विसंवादो

67 विलम्भस्त्वतिसर्जनम् ॥ १५१९ ॥

68 उपलम्भस्त्वनुभवः

69 प्रतिलम्भस्तु लम्भनम् ।

70 नियोगे विधिसंप्रैषौ

71 विनियोगोऽर्पणं फले ॥ १५२० ॥

72 लवोऽभिलावो लवनं

73 निष्पावः पवनं पवः ।

74 निष्ठीवष्ठीवनष्ठ्यूतष्ठेवनानि तु थूत्कृते ॥ १५२१ ॥

75 निवृत्तिः स्यादुपरमो व्यवोपाङ्भ्यः परा रतिः ।

76 विधूननं विधुवनं

77 रिङ्गणं स्खलनं समे ॥ १५२२ ॥

78 रक्षणस्त्राणो

79 ग्रहो ग्राहे

80 व्यधो वेधे

63. Vertrauen (2 W.). — 64. Veränderung (2 W.). — 65. Umdrehung (6 W.). — 66. Hintergehen (2 W.). — 67. Freigebigkeit (2 W.). — 68. Wahrnehmung (2 W.). — 69. Empfangen, Erhalten (2 W.). — 70. Auftrag (3 W.). — 71. Geben, mit Aussicht auf Vergeltung. — 72. Kornschneiden (3 W.). — 73. Kornreinigung (3 W.). — 74. Speien (5 W.). — 75. Aufhören (6 W.). — 76. Bewegung (2 W.). — 77. Ausgleiten (2 W.). — 78. Schutz (2 W.). — 79. Greifen (2 W.). — 80. Durchbohren (2 W.).

81 क्षये क्षिया ।
82 स्फुरणं स्फरणे
83 ज्यानिर्जीर्णा-
84 वथ वरो वृतौ ॥ १५२३ ॥
85 समुच्चयः समाहारो
86 ऽपहारापचयौ समौ ।
87 प्रत्याहार उपादानं
88 बुद्धिशक्तिस्तु निष्क्रमः ॥ १५२४ ॥
89 इत्यादयः क्रियाशब्दा लक्ष्या धातुषु लक्षणम् ।
90 अथाव्ययानि वक्ष्यन्ते
91 स्वः स्वर्गे
92 भू रसातले ॥ १५२५ ॥
93 भुवो विहायसा व्योम्नि
94 द्यावाभूम्योस्तु रोदसी ।
95 उपरिष्टादुपर्यूर्ध्वे
96 स्यादधस्तादधो ऽप्यवाक् ॥ १५२६ ॥
97 वर्जने त्वन्तरेणार्ते हिरुङ्नाना पृथग्विना ।

81. Vernichtung (2 W.). — 82. Zittern (2 W.). — 83. Entkräftung, Altersschwäche (2 W.). — 84. Ein Gnadengeschenk, das man sich auswählt (2 W.). — 85. Anhäufung (2 W.). — 86. Verlust (2 W.). — 87. Ablenken der Sinne (2 W.). — 88. Geistesvermögen. — 89. Die übrigen Wörter, die eine Thätigkeit ausdrücken, definire man selbst; die Merkmale sind in den Wurzeln enthalten. — 90. Nun werden die Indeclinabilia aufgeführt werden. — 91. Himmel. — 92. Pâtâla. — 93. Luft, Himmel (2 W.). — 94. Himmel und Erde. — 95. Oben (2 W.). — 96. Unten (2 W.). — 97. Ohne (6 W.).

98 साकं सत्रा समं सार्धममा सह

99 कृतं खलम् ॥ १५२७ ॥

1 भवत्वस्तु च किं तुल्याः

2 प्रेत्यामुत्र भवान्तरे ।

3 तूष्णीं तूष्णीकां जोषं च मौने

4 दिष्ट्या तु संमदे ॥ १५२८ ॥

5 परितः सर्वतो विष्वक्समन्ताच्च समन्ततः ।

6 पुरः पुरस्तात्पुरतो ऽग्रतः

7 प्रायस्तु भूमनि ॥ १५२९ ॥

8 सांप्रतमधुनेदानीं संप्रत्येत-

9 र्ह्यथाञ्जसा ।

10 द्राक्स्रागरं झटित्याशु मङ्क्ष्वह्नाय च सत्वरम् ॥ १५३० ॥

11 सदा सनानिशं शश्व-

12 द्भूयो ऽभीक्ष्णं पुनः पुनः ।

13 असकृन्मुहुः

14 सायं तु दिनान्ते

15 दिवसे दिवा ॥ १५३१ ॥

16 सहसैकपदे सद्यो ऽकस्मात्सपदि तत्क्षणे ।

17 चिराय चिररात्राय चिरस्य च चिराच्चिरम् ॥ १५३२ ॥

98. Mit (6 W.). — 99. 1. Unnütz (5 W.). — 2. Im jenseitigen Leben (2 W.). — 3. Still (3 W.). — 4. Ausruf der Freude. — 5. Von allen Seiten (5 W.). — 6. Vorn (4 W.). — 7. Gewöhnlich. — 8. Jetzt (5 W.). — 9. 10. Sogleich, eiligst (8 W.). — 11. Immer (4 W.). — 12. 13. Zu wiederholten Malen (5 W.). — 14. Am Abend. — 15. Am Tage. — 16. Plötzlich (5 W.). — 17. 18. Nach

18 चिरेण दीर्घकालार्थे

19 कदाचिज्जातु कर्हिचित् ।

20 दोषा नक्तमुषा रात्रौ

21 प्रगे प्रातरहर्मुखे ॥ १५३३ ॥

22 तिर्यगर्थे तिरः साचि

23 निष्फले तु वृथा मुधा ।

24 मृषा मिथ्यानृते

25 ऽभ्यर्णे समया निकषा हिरुक् ॥ १५३४ ॥

26 शं सुखे

27 बलवत्सुष्ठु किमुतातीव निर्भरे ।

28 प्राक्पुरा प्रथमे

29 संवद्वर्षे

30 परस्परे मिथः ॥ १५३५ ॥

31 उषा निशान्ते

32 ऽल्पे किंचिन्मनागीषच्च किंचन ।

33 आहो उताहो किमुत वितर्के किं किमूत च ॥ १५३६ ॥

34 इतिह स्यात्संप्रदाये

35 हेतौ यत्तद्यतस्ततः ।

langer Zeit (6 W.). — 19. Einstmals (3 W.). — 20. In der Nacht (3 W.). — 21. Bei Tagesanbruch (2 W.). — 22. Seitwärts (2 W.). — 23. Vergeblich (2 W.). — 24. Fälschlich (2 W.). — 25. In der Nähe (3 W.). — 26. Glücklich. — 27. Sehr (4 W.). — 28. Vormals (2 W.). — 29. Im Jahre. — 30. Gegenseitig. — 31. Am Ende der Nacht. — 32. Etwas (4 W.). — 33. Oder; entweder — oder (6 W.). — 34. So nach der Tradition. — 35. Weil, deshalb (4 W.).

36 संबोधने ऽङ्ग भोः प्याट्पाड्हे हंहो अरे ऽयि रे ॥ १५३७ ॥
37 श्रौषड्वौषड्वषट्स्वाहा स्वधा देवहविर्हुतौ ।
38 रहस्युपांशु
39 मध्ये ऽन्तरन्तरेणान्तरे ऽन्तरा ॥ १५३८ ॥
40 प्रादुराविः प्रकाशे स्या-
41 दभावे त्व न नो नहि ।
42 हठे प्रसह्य
43 मा मास्म वारणे
44 ऽस्तमदर्शने ॥ १५३९ ॥
45 अकामानुमतौ कामं
46 स्यादोमां परमं मते ।
47 कच्चिदिष्टपरिप्रश्ने
48 ऽवश्यं नूनं च निश्चये ॥ १५४० ॥
49 बहिर्बहिर्भवे
50 ह्यः स्यादतीते ऽह्नि
51 श्व एष्यति ।
52 नीचैरल्पे

36. Interjectionen beim Rufen (10 W.). — 37. Ausrufungen beim Opfern (5 W.). — 38. Insgeheim. — 39. In; zwischen (4 W.). — 40. Hervor, zum Vorschein (2 W.). — 41. Un-, nicht (4 W.). — 42. Gewaltsam. — 43. Prohibitive Partikel (2 W.). — 44. Unter(gehen). — 45. Gut, wenn es nicht anders sein kann. — 46. Gut; so sei es (3 W.). — 47. Fragepartikel bei Fragen, auf die man eine bejahende Antwort erwartet. — 48. Gewiss (2 W.). — 49. Ausserhalb. — 50. Gestern. — 51. Morgen. — 52. Gelinde, leise.

53 मन्दत्युच्चैः
54 सत्त्वे ऽस्ति
55 दुष्ठु निन्दने ॥ १५४१ ॥
56 ननुच स्याद्विरोधोक्तौ
57 पक्षान्तरे तु चेद्यदि ।
58 शनैर्मन्दे
59 ऽवरे त्वर्वा-
60 ग्रोषोक्तावुं
61 नतौ नमः ॥ १५४२ ॥

॥ इत्याचार्यहेमचन्द्रविरचितायामभिधानचिन्तामणौ नाममालायां सामान्यकाण्डः षष्ठः ॥

53. Heftig, laut. — 54. Vorhanden. — 55. Schlecht. — 56. Partikel, die eine entgegengesetzte Ansicht andeutet. — 57. Wenn (2 W.). — 58. Langsam. — 59. Nach; hinter. — 60. Ausruf des Zornes. — 61. Verbeugung.

ANMERKUNGEN.

Str. 1. *a. Schol.* सिद्धं प्रतिष्ठां प्राप्तं साङ्गं शब्दानुशासनं यस्येति कर्तृविशेषणम्। अङ्गानि लिङ्गधातुपारायणादीनि। एतावता च शब्दानुशासने(न) सहास्या एककर्तृकत्वमाह। — *b.* रूढादीनां नाम्नां शब्दानां मालामभिधानचिन्तामणिनाम्नीं तनोमि। अहमिति कर्तृनिर्देशः।

Str. 2. *a. Schol.* आखण्डलादय उदाहरणम्। न ह्यत्र प्रकृतिप्रत्ययविभागेन व्युत्पत्तिरस्ति। आदिशब्दादाण्टपादयः। यद्यपि नाम च धातुजमिति शाकटायनमतेन रूढा अपि व्युत्पत्तिभाजस्तथापि वर्णानुपूर्वीनिर्ज्ञानमात्रप्रयोजना तेषां व्युत्पत्तिर्न पुनरन्वर्थः। अर्थप्रवृत्तौ कारणमिति रूढा अव्युत्पन्ना एव। — *b. D.* und *Calc.* Ausg. सत्व st. स तु। — *Schol.* शब्दानां परस्परमर्थानुगमनमन्वयः। स योगः। स पुनर्योगो गुणात्क्रियायाः संबन्धाच्च भवति।

Str. 3. *a. Schol.* गुणनिबन्धनो येषां योगस्ते शब्दा नीलकण्ठाद्याः। नीलः कालो ऽस्येति गुणप्राधान्यान्नीलकण्ठः शंकरः। संख्यापि गुण एवेति त्रिलोचनः। — । क्रियानिबन्धनो योगो येषां ते स्रष्टृप्रभृतयः। सृजतीति सर्जनप्राधान्यात्स्रष्टा ब्रह्मा। — *b. B. D.* स्वस्वामित्वादिः संबन्ध°. —

Schol. स्वमात्मीयम् स्वामी यस्तत्र प्रभविष्णुः । तयोर्भावः स्वस्वामित्वम् तदादि संबन्धः । आदिशब्दाज्जन्यजनकभावादिपरिग्रहः । तत्र स्वस्वामिभावे संबन्धे पालादयः शब्दाः स्वात्परे नियोजितास्तद्वतां स्वामिनां नामाङ्कः । — । तत्राङ्कर्नाम तद्वतामित्युत्तरेष्वप्यनुवर्तनीयम्

Str. 5. *a. Calc.* Ausg. und *D.* कवे रूढा । — *Schol.* कवीनां रूढिः परंपरायाता प्रसिद्धिः । — *b.* जन्यात्कार्यात्परे कृदादयस्तद्वतो जनकानां कारणानां नामाङ्कः । यथा विघ्नकृत् u. s. w.

Str. 7. *b. Calc.* Ausg. *C. D.* und *E.* पाशासनादयः, der Scholiast wie wir.

Str. 9. *b. Calc.* Ausg. und *D.* ज्ञातेः st. ज्ञातेः ।

Str. 10. *b. Calc.* Ausg. रिपु st. अरि.

Str. 11. *a.* Dürfte man nicht bei einem so späten Autor wie Hemak'andra diesen Vers noch zur vorhergehenden Strophe ziehen? Dann kämen die 7 folgenden Strophen in Ordnung, und 18. *b.* könnte man wieder an die vorhergehende Strophe anschliessen.

Str. 11. *b.*—13. *a. Schol.* विवक्षानिबन्धनो संबन्धः । तत एकस्मादपि वृषादेः संबन्धिपदात्परे संबन्धान्तरनिबन्धना वाहनादयाः शब्दा यथोचितं प्रयुज्यन्ते । एतदेवाह । वाह्यवाहकभावसंबन्धविवक्षायां यथा वृषवाहनो रुद्र इति भवति तथा स्वस्वामिभावसंबन्धविवक्षायां वृषपतिरित्यपि ॥

Str. 14. *b.* 15. *a. Schol.* चिह्नैर्विशेषणैर्व्यक्तेर्निःसंदेहैरित्यभिधायको ऽपि शब्दो व्यक्तेर्वाचको भवेत् व्यक्तेर्नामतां यातीत्यर्थः । तथा ह्रीत्यादिना उदाहरणमाह । अगस्तिना ऋषिविशेषेण पूता स्वस्थित्या पवित्रितेति व्यक्तं चिह्नम् तेन विनिर्मिता दिगिति ज्ञातिशब्दो दक्षिणाशाया व्यक्तेरभिधायी भवति । एवं सप्तर्षिपूता दिगुत्तराशा ।

Str. 15. *b.* 16. *a.* *Schol.* त्रिपञ्चसप्तादिस्थाने ऽयुग्विषमशब्दौ त्रिने-
त्रादिषु पदेषु योजनीयौ । यथा त्रिनेत्रो ऽयुग्नेत्रो विषमनेत्रश्च शंभुः ।

Str. 16. *b.* *Schol.* विरोध्यर्थं विरोधिनमर्थम्

Str. 17. *b.* *Calc.* Ausg. *C.* und *E.* वाडवाग्नि, der Scholiast wie wir.

Str. 18 *b.* *Calc.* Ausg. योगाः स्युरिति, *E.* योगा स्यु°, *D.* योगा-
स्स्यु°. *Schol.* योगादन्वयात्

Str. 19. *Schol.* मिश्रा योगयुक्ता रूढिमन्तश्च । — लिङ्गमस्मदुपज्ञलि-
ङ्गानुशासनाद्धेयं निर्णेतव्यम् अत एवास्माभिरमरकोषाद्यभिधानमालास्वि-
वात्र लिङ्गनिर्णयो नोक्तः ।

Str. 20. *Schol.* इह हि मुक्तगतिर्देवगतिर्मनुष्यगतिस्तिर्यग्गतिर्नरक-
गतिरिति जीवानां पञ्च गतयो भवन्ति । तद्भेदाज्जीवा अपि मुक्ता देवा मनु-
ष्यास्तिर्यञ्चो नरकाश्चेति पञ्चधा भवन्ति । ... । देवाधिदेवा अर्हन्तः । ... ।
एकेन्द्रियादयः । तत्र एकं स्पर्शनमिन्द्रियं येषां त एकेन्द्रियादयः ।

Str. 21. *b.* *B.* und *D.* पोलक st. पोलुक, der Schol. पिपीलिका in der Umschreibung. — *Schol.* द्वे स्पर्शनरसने त्रीणि स्पर्शनरसनघ्राणानि च-
त्वारि तान्येव चक्षुःसहितानि इन्द्रियाणि येषां ते तथा । पञ्च स्पर्शनादी-
नि श्रोत्रसहितानीन्द्रियाणि येषां ते पञ्चेन्द्रियाः ।

Str. 23. *a.* साङ्गास् ist, wie wir aus den Scholien ersehen, auch bei देवाधिदेवास् (Str. 20. *a.*) u. s. w. zu ergänzen.

Str. 24. *Schol.* चतुस्त्रिंशदतिशयान्सुरेन्द्रादिकृतां पूजां चार्हतीत्य-
र्हन् — अरिहननात् रजोहननात् रहस्याभावाच्चेति वा पृषोदरादित्वात्
(Pâṇ. VI. 3. 109.). Hiernach ist Burnouf's Bemerkung in «*Introduction à l'histoire du Buddhisme Indien.*» Tome I. S. 295., so wie Böhtlingk's in «*Bulletin de la classe historico-philologique de l'Acad. Imp. des sc. de St.-Pét.*» T. II. No. 22. S. 344. zu berich-

tigen. — *Schol.* जयति रागद्वेषमोहानिति जिनः ।—। जीर्णान्यष्टौ ज्ञा-
नावरणीयादीनि कर्माण्यस्य जीर्णाष्टकर्मा — भगो जगदैश्वर्यं ज्ञानं वास्त्यत्र
भगवान् — तीर्यते संसारसमुद्रो ऽनेनेति तीर्थं प्रवचनाधारश्चतुर्विधः संघः ।
तत्करोतीति तीर्थंकरः ।—। रागादिजेतारो जिनाः केवलिनः । तेषामीश्वरो
जिनेश्वरः ।

Str. 25. स्यादित्यव्ययमनेकान्तवाचकम् ततः स्यादित्यनेकान्तं वदतीत्ये-
वंशीलः स्याद्वादी । स्याद्वादो ऽस्यास्तीति वा । यौगिकत्वादनेकान्तवादी-
त्यपि ।—। सर्वेभ्यः प्राणिभ्यो हितः सार्वः ।—। सर्वथावरणविलये चेत-
नस्वरूपाविर्भावः केवलम् तदस्यास्ति केवली । — *Calc.* Ausg. *B.* und *D.*
बोधद, *Schol.* बोधिर्जिनप्रणीतधर्मप्राप्तिः । तां ददाति बोधिदः ।—। हि-
तोपदेशकत्वादाप्त इवाप्तः ।

Str. 26. *Calc.* Ausg. *A. B. D.* und *E.* °संभवो, *Schol.* शं सुखं
भवत्यस्मिन् अथवा गर्भगते ऽप्यस्मिन्नभ्यधिकसस्यसंभवात्संभवो ऽपि ।—।
पद्मस्येव प्रभास्य पद्मप्रभः ।

Str. 27. *Calc.* Ausg. श्रेयांशो, *Schol.* श्रेयांसावंसावस्य श्रेयांसः पृषो-
दरादित्वात् (Pâṇ. VI. 3. 109.) — । वसुपूज्यस्य नृपतेरयं वासुपूज्यः । —
न विद्यते गुणानामन्तो ऽस्य अनन्तः । तीर्थकृत् gehört demnach nicht
zum Namen.

Str. 28, 10. Einige Handschriften नमिः statt नेमिः, welche Form
auch der Scholiast kennt. *Schol.* नेमीतीनन्तो ऽपि दृश्यते यथा वन्दे
सुव्रतनेमिनाविति ।

Str. 30, 16. अरिष्टनेमि oder अरिष्टनेमिन्, die Schol. — 18. ज्ञातकु-
लोत्पन्नत्वाज्ज्ञातः सिद्धार्थराजः । तस्य नन्दनो ज्ञातनन्दनः ।

Str. 31. Die Scholien : अस्य वीरजिनस्य श्रमणानां संघाः समूहा गणाः ।
ते च नवसंख्याः । यद्यपि परमेश्वरस्य एकादश गणधरा आसंस्तथापि नवा-

नामेव गणधराणां विभिन्ना वचना अभवन् अकम्पिताचलभ्रात्रोर्मेतार्यप्रभास-योश्च यथा सदृत्ता एव वचना अभूवन्निति नवैव गणाः। — । गौतमास् = गौतमस्यापत्यानि वृद्धानि ।

Str. 32. *Schol.* व्यक्तो भारद्वाजगोत्रः । *Calc.* Ausg. सुधर्मा, der Scholiast: सुधर्माग्निवैश्यगोत्रजः । मण्डित oder मण्डितपुत्र, die Scholien. मण्डित ist ein वासिष्ठ, मौर्यपुत्र ein काश्यप, अकम्पित ein गौतम, अचलभ्रातृ ein ...र्व्हा...ईतगोत्र, मेतार्य und प्रभास endlich (*C.* Ausg. मेतार्यप्रभासश्च) sind काण्डिन्यौ ।

Str. 33, 23. Die Schol. केवली ननु (wohl: न तु) तीर्थकरः । चरमो ऽन्तिमः । अतः परम् एतस्यामवसर्पिण्यां केवलिनामसंभवात् — 24, 25. *Calc.* Ausg. प्रभवः प्रभुः । Die Scholien: चतुर्दशपूर्वधारिणां प्रभवादिषट्श्रुतकेवलिनां नामानि ।

Str. 34, 26. *Schol.* एते षट्श्रुतेन केवलिनः । — 27. गुरुत्वाद्वज्र इव वज्रो वज्रस्वामी । सो ऽन्तो येषां ते वज्रान्ताः । दशभिः पूर्वधराः । दश पूर्वाणि एषां सन्तीत्यर्थः । ततः परं दशपूर्वधराणामसंभवात्

Str. 36, 31. *Calc.* Ausg. मल्हसेन°, die Scholien wie wir, indem sie मल्ह durch पूज्य erklären.

Str. 40, 38. *Calc.* Ausg. त्रिशला, der Schol. wie wir. — 39. *Calc.* Ausg. *A.* und *C.* विप्रा st. वप्रा, der Schol. wie wir.

Str. 42, 43. पत्नेट् *Nom.* von पत्नेप्र्

Str. 43, 45. *Calc.* Ausg. °पार्श्वौ ।

Str. 45, 48. *Calc.* Ausg. *A. C.* und *E.* अङ्कुशी, der Scholiast wie wir. — 49. Der Schol. धरति धारणी (?) ।

Str. 46, 50. *Calc.* Ausg. *A.* und *B.* नरदत्ता, der Schol. wie wir.

Str. 49, 57. *Schol.* नेमिमुनी इत्यरिष्टनेमिमुनिसुव्रतौ ।

Str. 52, 62. *Schol.* न विद्यते गाम्भीर्यात्स्ताघो लब्धमध्यतास्य अस्ताघः । 63. *B.* und die Scholien: कृतार्घो, die übrigen: कृतार्घा ।

Str. 56, 71. *Calc.* Ausg. *C.* und *D.* जिनोत्तमः, der Schol. एवमि- ति चतुर्विंशतिः सर्वासु वर्तमानातीतानागतास्ववसर्पिणीषु (उत्सर्पिणीषु च) कालविशेषेषु जिनोत्तमास्तीर्थकरा भवन्तीति ।

Str. 57, 73. *Calc.* Ausg. *C.* und *D.* अवसन्नम् st. अविघ्नम्, der Schol. अविघ्नमनामगन्धि । — गोत्तोर° ist mit हृदिर, अविघ्न mit आनिय zu verbinden.

Str. 58, 74. *Schol.* आहारो ऽभ्यवहरणाम् नीहारो मूत्रपुरीषोत्सर्गः । तयोर्विधिः क्रिया न दृश्यते । अदृश्य इति । — 75. योजनप्रमाणे ऽपि क्षेत्रे समवसरणभुवि नृणां देवानां तिरश्चां च जनानां कोटिकोटिसंख्यानां (*Calc.* Ausg. कोटिकोटैः) स्थितिरवस्थानमिति प्रथमः कर्मक्षयजो ऽतिशयः ।

Str. 59, 76. *Schol.* वाणी भाषा अर्धमागधी नरतिर्यक्सुरलोकभाषया संवदति तद्भाषाभावेन परिणमतीत्येवंशीला । योजनमेकं गच्छति व्याप्नोती- त्येवंशीला योजनगामिनी चेति द्वितीयः । — 77. *Calc.* Ausg. und *C.* ओः, *E.* ओ ।

Str. 60. *Schol.* साग्रे (*Calc.* Ausg. *C. E.* साग्ये) पंचविंशतियोजना- धिके गव्यूतीनां शतद्वये (= योजनशते) । गव्यूतिः क्रोशद्वयम् रुजा रोगा ज्वरादिर्न स्यादिति चतुर्थो ऽतिशयः । — । ईतिर्धान्याद्युपद्रवकारी प्रचुरो मूषकादिः प्राणिगणो न स्यादिति षष्ठः । — । मारिरौत्पातिकं सर्वगतं मरणम् — । स्वराष्ट्रात्परराष्ट्राच्च भयं न स्यादित्येकादशः । कर्मणां ज्ञाना- वरणीयादीनां चतुर्णां घातादुत्पन्न इति ।

Str. 61, 80. त्रि ergänzt der Scholiast bis रत्नमयध्वज inclusiv.

Str. 62, 82. *Calc.* Ausg. *C.* und *D.* चतुर्मुखाङ्गताश्चैत्य°, der Scholiast wie wir. — Die Scholien: चैत्याभिधानो ऽशोकवृक्षः ।

Str. 63, 85. Die Scholien: तथा भवनपत्यादिचतुर्विधदेवनिकायानां जघन्यतो (sic) ऽपि समीपे कोटिर्भवति ।

Str. 64, 86. *Calc.* Ausg. क्रतूनाम्, die Scholien: ऋतूनां वसन्तादीनां सर्वदा पुष्पादिसामग्रीभिरिन्द्रियार्थानां स्पर्शरसगन्धरूपशब्दानामपकर्षेण मनोज्ञानां च प्रादुर्भावेनानुकूलत्वं भवति । — 87. *Calc.* Ausg. *C. D.* देव्यास्
st. दैव्यास् (= देवैः कृताः) ।

Str. 65. *Schol.* संस्कारवत्त्वं संस्कृतादिलक्षणयुक्तत्वम् औदात्त्यम् (*Calc.* Ausg. *C. D.* औदार्यम्, was erst 69, 96. erscheint) उच्चैर्वृत्तिता । उपचारपरीतता अग्राम्यत्वम् मेघगम्भीरघोषत्वं (*Calc.* Ausg. *C.* und *D.* मेघनिर्घोषगाम्भीर्यं) मेघस्येव गम्भीरशब्दत्वम् प्रतिनादविधायिता प्रतिरवोपेतत्वम्

Str. 66. दक्षिणत्वं (sic) सरलत्वम् उप° मालवकैशिकादिग्रामरागयुक्तत्वात् एते सप्त शब्दापेक्षया अतिशयाः । अन्ये त्वर्थाश्रयाः । तत्र महार्थता बृहदभिधेयता । अव्या° पूर्वापरवाक्यार्थाविरोधः । शि° अभिमतसिद्धान्तोक्तार्थता वक्तुः शिष्टतासूचकत्वं च ।

Str. 67. *Schol.* निरा° परदूषणाविषयता । हृदयंगमता (*Calc.* Ausg. *A. C.* und *D.* °गमिता) हृदयग्राह्यत्वम् मिथः° परस्परेण पदानां वाक्यानां वा सापेक्षत्वम् प्रस्ता° देशकालव्यतीतत्वम् तत्त्व° विवक्षितवस्तुरूपानुसारिता ।

Str. 68. *Schol.* अप्रकीर्ण° सुसंबद्धस्य सतः प्रसरणमथवा असंबद्धाधिकारत्वातिविस्तरयोरभावः (die Handschrift: °यो ऽभावः) । अस्वश्लाघान्यनिन्दता (*Calc.* Ausg. *C.* असुश्ला°, °निन्दता hat bloss *B.*, die übrigen: °निन्दिता) आत्मोत्कर्षपरनिन्दाविप्रयुक्तत्वम् आभि° वक्तुं (l. वक्तुः) प्रतिपाद्यस्य वा भूमिकानुसारिता । अति° घृतगुडादिवत्सुखकारित्वम् प्र° उक्तगुणयोगात्प्राप्तश्लाघ्यता ।

Str. 69. *Schol.* अमर्म° (*Calc.* Ausg. und *C.* अमर्मवेधिता) परमर्मानुद्घट्टनस्वरूपत्वम् औ° अभिधेयस्यार्थस्यानुच्छत्वम् (?) धर्मा° धर्मार्थाभ्यामनपेतत्वम् कार° कारककालवचनलिङ्गादिव्यत्ययवचनदोषापेतत्वम् विभ्रमा° विभ्रमो वक्तृमनसो भ्रान्तता। सादिर्येषां विक्षेपादीनां स विभ्रमादिर्मनोदोषः। तेन वियुक्तत्वम्।

Str. 70. *Schol.* चित्र° उत्पादिताच्छिन्नाकौतूहलत्वम् (l. चित्रात्कौ°) अद्भु° प्रतीतम् —। अनेक° जातयो वर्णनीयवस्तुस्वरूपवर्णनानि तत्संभवाद्विचेत्रत्वम् (l. तत्संभवाद्विचित्रत्वम्) आरो° वचान्तरापेक्षया (sic) आहितातिशेषणत्वम्

Str. 71. *Schol.* सत्व° साहसोपेतता। —। अव्युच्छित्तिर् (*Calc.* Ausg. *B.* und *D.* अव्युत्थितिर्) विवक्षितार्थसम्यक्सिद्धिर्यावदव्यवच्छिन्नवचनप्रमेयता। अखे° अनायाससंभवम् (sic)

Str. 72. *Schol.* दानगतो ऽन्तराय (*Calc.* Ausg. *A. C.* und *D.* आन्तराया) इत्येको दोषः। — भुज्यते भोगः स्रगादिः। तद्गतो ऽन्तरायः। उपभुज्यत उपभोग ऽङ्गनादिः। तद्गतो ऽन्तरायः। — *Calc.* Ausg. *C. E.* रत्यरतिभी°।

Str. 73. *Schol.* मिथ्यात्वं दर्शनमोहः। —। राग (*Calc.* Ausg. und *D.* रागो) सुखाभिज्ञस्य (sic) सुखानुस्मृतिः। सुखेन तत्साधननेष्वभिमते (sic) विषये गर्द्धा। द्वेषो दुःखानुस्मृतिपूर्वो दुःखे (l. °तिः। पूर्वे) तत्साधने वा क्रोधः। इत्यष्टादश दोषास्तेषामृषभादीनामर्हतां न भवन्तीति॥

Str. 75, 11. Randglosse: द्वयोरप्यमध्यो ऽपि श्रवणा इति।

Str. 76, 12. *B.* allein यती, die übrigen व्रती। *Schol.* यतं यमनमस्त्यस्य यती। — 14. *Schol.* आदिशब्दात्तान्त्यादयः। ततस्तपोधनो योगी शमकृत्तात्मानित्यादीनि यौगिकानि नामानि भवन्ति।

Str. 77, 15. *Calc.* Ausg. *C.* und *D.* ज्ञानं श्रद्धानं । Der Scholiast: नराणां चारित्रं सावद्ययोगत्यागः । — 17. निषेकादिकरो गुरुरित्यन्ये ।

Str 78, 18. अनुयोगं व्याख्यां करोत्यनुयोगकृत् — 20. Die *Calc.* Ausg. *C.* und *D.* गुरोश्च st. गणिश्च । Die Scholien: गण्यते पूज्यते इति गणिः ।

Str. 79, 22. *Calc.* Ausg. प्रथम° । — 24. *Schol.* विवेचनं ज्ञेयोपादेयज्ञानं विवेकः । अविवेकात्पृथग्भिन्न आत्मा पृथगात्मा । तद्भावः पृथगात्मता ।

Str. 80, 25. *Schol.* ब्रह्म आगमः । समानब्रह्मचारिणा इति वा ।

Str. 81, 27. *Schol* प्रवृज्यापि (l. प्रव्रज्यापि) ।

Str. 82, 29. *Calc.* Ausg. *C. D.* शौचसंतोषौ ।

Str. 84, 35. *Schol.* विषये तस्मिन्निति देवतादौ ध्येये एका प्रत्ययान्तरेणापरामृष्टा प्रत्ययस्य ध्येयालम्बनस्य संततिः सदृशप्रवाह इति ।

Str. 85, 36. *Schol.* तदेव ध्यानमेवार्थमात्राभासनरूपं ध्येयाकारनिर्भासात्मकं ध्येयस्वभावावेशात्

Str. 86, 39. *Schol.* शस्यते स्तूयत इति शस्तम् प्रशस्तमित्यपि ।

Str. 87, 40. *Schol.* त्रिपिष्टपमिति प्राच्याः । ते हि प्रायो पवौ शसौ च व्यत्यस्य पठन्ति । — दिव् *f.* oder दिव *n.*, eine Randglosse. — 41. *Calc.* Ausg. und einige Handschriften: ऊर्द्ध्लोकः । *Schol.* अस्य यौगिकत्वात्रिदशावासदेवलोकप्रभृतयो गृह्यन्ते । — 42. *Schol.* तत्सद् इति तच्छब्देन स्वर्गः परामृश्यते । तत्र सीदन्तीति तत्सदः । यौगिकत्वाद्ब्रह्मसद्मान इत्यादयः ।

Str. 88, 43. *Calc.* Ausg. *C. D.* und *E.* बार्हमुखा°, der Scholiast wie wir. — Ders. नाकः स्वर्गो विद्यते येषां ते नाकिनः । यौगिकत्वात्स्वर्गिणस्त्रिदिवाधीशा इत्यादयो ऽपि । — 44. भुक्शब्दः स्वाहादीनां प्रत्येकं

संबध्यते। तेन स्वाहाभुगित्यादयः। स्वाहा भुज्यत इत्यादि कृत्वा एषां यौगिकत्वात्स्वाहाशना: स्वधाशना यज्ञाशना अमृतान्धस इत्यादयो ऽपि। — । आदितेयाः। यौगिकत्वाददित्या अदितिजा इत्यादयो ऽपि।

Str. 89, 45. *Schol.* दानवारयः। यौगिकत्वाद्दनुजद्विष इत्यादयः। — 46. तेषां देवतानां यानं वाहनं देवयानं सुरयानमित्यादि। — विमानः। व्योमयानमित्यपि। तेषां विमानो यानमिति संबध्यते। विमानयाना वैमानिका इत्यादीनि यौगिकानि देवतानामानि ज्ञेयानि। — 47. देवान्धो देवान्नं देवभोज्यं देवाहार इति। -- पीयूषम् oder पेयूषम्, der Schol. Ein 4tes Synonym ist समुद्रनवनीतम्

Str. 90. Die Scholien: देवाश्च जैनसमये भवनपतिव्यन्तरज्योतिष्कवैमानिकभेदाच्चतुर्धा भवन्ति। — । दशेति दशसंख्या असुरादयः रत्नप्रभाया मध्ये भवन्तीति। भवनानि आवासाः। तेषामधीशा भवनाधीशाः। कुमारान्ताः कुमारशब्दान्ताः। तेन असुरकुमारा तडित्कुमारा नागकुमाराः। — । कुमारवदेते कान्तदर्शनाः।

Str. 91. Die Scholien: विविधेषु शैलकन्दरान्तरवनविवरादिषु प्रतिवसन्तीति व्यन्तराः। वनानां समूहो वानम् तस्यान्तरे भवन्तीति पृषोदरादित्वाद्वानमन्तरा इत्यपि। *Calc.* Ausg. राक्षसा ohne *Visarga.*

Str. 92, 93. Die Scholien: विमानेषु भवा वैमानिकाः। ते च द्विविधाः कल्पभवाः कल्पातीताश्च। कल्पः समुदायसंनिवेशो विमानमात्रपृथ्वीप्रस्तारः। तत्र भवाः कल्पभवा द्वादश। ते पुनरमी। सुधर्मा देवसभा। सास्मिन्नस्तीति सौधर्मः कल्पः। तत्र जाताः सौधर्मजाः। ईशानस्य इन्द्रस्य निवास ईशानः कल्पः। ऐशानकल्प इत्यन्ये। तत्र जाता ईशानजा ऐशानजा वा। एवं सनत्कुमारादिकल्पेषु जाताः सानत्कुमारजाः। माहेन्द्रजाः। ब्रह्मा ब्रह्मलोको ऽभिधीयत इति ब्रह्मजाः। लान्तकजाः। शुक्रजाः। सहस्रारजाः। आनतजाः। प्राणतजाः। आरणजाः। अच्युतजाः।

Str. 94. *Schol.* कल्पा° (*Calc.* Ausg. कल्पातीता) कल्पानतिक्रम्योपरिष्ठिताः । लोकपुरुषस्य ग्रीवाप्रदेशविनिविष्टा ग्रीवाभरणभूता ग्रैवेयकाः । *Calc.* Ausg. und *C.* त्वमुत्तराः । *Schol.* न विद्यत उत्तरो येभ्यस्त अनुत्तराः । विजयवैजयन्तजयन्तापराजितसर्वार्थसिद्धिनामानः । निकायो निवास उत्पादस्थानम् तथा हि भवनपतयो ऽशीतिसहस्राधिकयोजनलक्षपिण्डायां रत्नप्रभायामूर्ध्वमधश्च योजनसहस्रमेकैकमपहाय जन्मासादयन्ति । व्यन्तरास्तस्या एवोपरि यत्परित्यक्तं योजनसहस्रं तस्याध ऊर्ध्वं च योजनानामाद्य (sic) दशोत्तरयोजनशतपिण्डे नभोदेशे लोकान्तात्किंचिदूने जन्म गृह्णन्ति । विमानिका रज्जुमर्धामधिरुह्यामुतः सौधर्मादिषु कल्पेषु सर्वार्थसिद्धिविमानपर्यवसानेषूत्पद्यन्ते ।

Str. 95, 58. *Schol.* खर° यौगिकत्वात्खररश्मिर्दशशतरश्मिः शीतेतररश्मिरित्यादयो ऽपि । — 59. नभो° यौ° व्योमरत्नं दिनरत्नमित्यादयः । — 61. यमु° यौ° कालिन्दीसूर्यमसूरित्यादयो ऽपि ।

Str. 96, 62. *Schol.* सूरः । तालव्यादिरित्यन्ये । — 63. ध्वान्ता° यौ° तिमिरारिरित्यादयः । अब्जा° यौ° पद्मपाणिर्गभस्तिपाणिरित्यादयः । चक्रा° यौ° चक्रवाकबन्धुः पद्मबन्धुर्दिनबन्धुरित्यादयः ।

Str 97, 64. *Schol.* दिवादिभ्यः सप्तभ्यः शब्देभ्यः करशब्दः । तेन दिवाकरो दिनकरः । — अहस्करः । यौ° वासरकृद्दिनप्रणीर्दिनकृदित्यादयः । — 65. अह्ना° यौ° अह्नेशः पद्मिनीशस्त्विषामीशो दिनेश इत्यादयो ऽपि । — गग° यौ° नभःकेतनं नभःपान्थ इत्यादयः । *Calc.* Ausg. *A.* *C.* und *D.* गगनाध्व° ।

Str. 98, 66. *Schol.* भा° यौ° अंशुमानंशुमालीत्यादयः ।

Str. 99, 68. *Calc.* Ausg. *A.* und *C.* अभीषवः, die Scholien wie wir, mit Erwähnung der Variante. — 69. *Schol.* पृश्निरित्येके । व्राश्निरित्यन्ये ।

